Tamas or darkness is a positive entity and it is a *dravya.*[39] Manas is included in *anthakarana* which is a *dravya.(II.10). Ātman* is not a *dravya* as contended by *Nyāyavaiśeṣikas.* The author of *Siddhāntabindu* states that *dik* and *kāla* are not acceptable as separte entities since ether can serve the purpose of *dik,* and *kāla* is identical with *avidyā.*[40]

Thirty-two *guṇas* are enumerated under *guṇas. Pariṇāma, Paratva* and *aparatva* are brought under one head i.e. *parichcheda. Jāti* is treated as a *guṇa* under *ākāra. Sādṛśya* is also a *guṇa.*The opposites-*gurutva* and *laghutva, Kaṭiṇatva and mṛdutva* are separate *guṇās. Vṛtti-jñāna,sukha, duḥkh* etc., belong to *manas.*[41] *Saṁśaya, niścaya,*etc., are strictly speaking, cognative acts. (*vṛtti*); but these are called *jñāna* since the *vṛtti* defines consciousness. The duration of *vṛtti-jñāna* is not three moments as contended by *Nyāyavaiśeṣikas* but till generation of another *jñāna* opposite to the present one.(II.11-15).

Attributes come under *dharma,* relation is also a *dharma* or attribute. *Śakti* is an independent entity under *dṛśya* category. *Samavāya* and *viśeṣa* are rejected.

Among the four kinds of negations *(abhāvas),* the nature of *dhvaṁśa* deserves special attention. The locus of destruction is substantive cause; when substantive cause is destroyed, the destruction is also destroyed. *Atyantābhāva* is also a counter-corollary to *dhvaṁsa.* (II. 21).

The entire *dṛśya* category as detailed above has no ultimate reality. These details have only empirical value. Therefore,

---

39. एवमविद्यात एवान्धकारोऽपि भावरूप एवावरणात्मा चाक्षुषज्ञानविरोधी आलोकनाश्यश्च झटेतिमहाविद्युदादिवदाविर्भवति तिरोभवतिचेति सिद्धान्तः। *S.B.*
उपचयापचयाद्यवस्थाभेदवत्त्वेनोपलभ्यमानस्याभावत्वायोगान्नीलरूपत्वेन द्रव्यत्वात् । *V.P.S.*

40. दिक्कालौत्वप्रामाणिकत्वान्नोक्तौ । आकाशस्यैव दिग्व्यवहारजनकत्वव्यवस्थासम्भवात् 'दिशः श्रोत्रमि'ति श्रुतेश्च । कालस्त्वविद्यैव तस्या एव सर्वाधारत्वादिति। *S.B.*

41. सा च वृत्तिश्चतुर्विधा संशयो निश्चयो गर्वस्स्मरणमिति । *V.P.*

Advaita writers are not much interested in elaborating these details.[42] The fundamental doctrine is that the existence, consciousness and bliss are present in every entity and entities differ only in name and form. Every entity has five characteristics i.e., existence, manifestation, desirability, form and name. Of these, the first three are of the nature of *Brahman;* the remaining two are of empirical world.[43]

Epistemology

Six *pramāṇas* viz., perception, inference, analogy, verbal testimony, presumption *(arthāpatti)* and non-cognition *(anupalabdhi)* are accepted by *Advaita Vedāntins.*

The *Nyāyavaiśeṣikas* hold perception to be the result of the contact between the object and the sense organ when it is in touch with the mind and the self.[44] The cogniser, the object cognised and the means of cognition are clearly demarcated in that system. The approach of *Advaita* thinkers to this question is altogether different. In their view, the subject-object distinction cannot be ultimate and the objects are not wholly independent of the subject. In case the two are different and independent of each other a relation would be required to relate the two and this relation itself would require another pair of relations to link it to the subject as well as the object; and so *ad infinitum.* Therefore, there is no basis for maintaining the obsolute distinctness of a perceptible object. The object must share the nature of the subject when it is perceived. In fact, the two are not different, though they appear to be so. The difference and the differents are super-imposed on the sole reality i.e.,

---

42. तस्मादलमनेनाऽनात्मचिन्तनेन । *S.B.*

43. अस्ति भाति प्रियं रूपं नामचेत्यंशपञ्चकम् ।
आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥
खवाय्वाग्निजलोर्वीषु देवतिर्यङ्नरादिषु ।
अभिन्नास्सच्चिदानन्दा भिद्येते रूपनामनी ॥ *Dr.Dr.V.*

44. इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् । आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन ततः प्रत्यक्षम् ।

consciousness *(Caitanya).* In other words, the object has no reality other than that of the percipient[45]. Therefore, perception is not the result of the subject and the object that are distinct, being put in contact through the sense organ but it is the revelation of non-difference between consciousness as defined by the cognative act *(vṛtti)* and that as defined by the object[46] (III.2). This takes place in the following manner: The internal organ which has predominantly *sattva* element i.e. of the nature of light, flows out through the sense-channels, reaches the locality of the object and pervades it like the water flowing from a tank through the canals and pervading the field[47] The flow of the internal organ is the cognative act *(vṛtti).* The consciousness defined by it is *pramāṇacaitanya.* The consciousness defined by the object is *viṣayacaitanya.* When the internal organ flows out and pervades the object, the non-difference between the two i.e. *pramāṇacaitanya* and *viṣayacaitanya* is revealed. This is perception. The consciousness defined by the internal organ within the body is *pramātṛcaitanya* also called *ahaṅkāra.* This is the agent. Thus, what matters in a perception is immediacy but not sense-organ generatedness. The immediacy is accomplished by removing the obscuration of *ajñāna* and revealing the non-difference of consciousness defined in terms of object and that of subject. This is done by the cognative act in varying degrees. The final removal of *ajñāna* is *akhaṇḍasākṣātkāra.*

In respect of inference, the *Advaita* writers make certain important departures from the *Nyāyavaiśeṣikas'* position. The residual impression of the pervasion *(vyāptisaṁskāra)* is considered as intermediary act *(vyāpāra)* instead of *Liṅga-*

---

45. विषयचैतन्यसत्तैव घटादिसत्ता । अधिष्ठानसत्तातिरिक्तारोपितसत्ताया अनङ्गीकारात् । विषयचैतन्यञ्च पूर्वोक्तप्रकारेण प्रमातृचैतन्यमेवेति प्रमातृचैतन्यस्यैव घटाद्यधिष्ठानतया प्रमातृसत्ता एव घटादिसत्ता नान्या । *V.P.*

46. प्रमाणचैतन्यस्य विषयावच्छिन्नचैतन्याभेदः । *V.P.*

47. यथा तटाकोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते । स एव परिणामो वृत्तिरित्युच्यते । *V.P.*

parāmarśa or *vyāptismaraṇa*[48]. The inferential cognition is only in respect of *sādhya* not in respect of *pakṣa* that being the object of perception.[49] (III.6). Only three members—*pratijñā, hetu, udāharaṇa*, or *udāharaṇa, upanaya nigamana* are sufficient for a syllogism.[50] The co-absence *(vyatireki)* and the bare co-presence *(kevalānvayi)* forms of inference are not accepted. In the inference of probandum *(sādhya)* through probans *(hetu)*, there is no use of the cognition of concomitance between the non-existence of probans and that of probandum. The bare co-presence is not acceptable to *Advaitins*, since all existents are counter-correlates of absolute non-existence located in *Brahman*.[51] (III. 7.8) With these changes and the changes consequent on these, the *Nyāyavaiśeṣika* pattern of inference is followed by *Advaita* writers.

With regard to *upamāna* or analogical reasoning also the position of *Advaitins* is different from that of *nyāya* school. According to *Naiyāyikas* the knowledge of similarily between a village-cow and a forest-cow leads to the knowledge of the relation between the name *gavaya* and the object denoted by it i.e. forest-cow.[52] But according to *Advaitins* the knowledge of similarity present in the forest-cow leads to the knowledge of similarity present in the cow.[53] The knowledge of similarity present in the village cow is not perception since the village cow is not actually present before the man moving in the forest; nor is it inference since the knowledge of similarity present in the forest cow is not the probans *(hetu)* for the knowledge of the similarity present in the village-cow. The circumstances under which the analogical cognition arises

48. तत्संस्कारोऽवान्तरव्यापारः । न तु तृतीयलिङ्गपरामर्शोऽनुमितौ करणम् । *V.P.*

49. वन्ह्यंश एवानुमितित्वम् । न तु पर्वतांशे । तदेशे प्रत्यक्षत्वस्योपपादित्त्वात्। *V.P.*

50. अवयवाश्च त्रय एव प्रतिज्ञाहेतूदाहरणरूपाः । उदाहरणोपनयनिगमनरूपा वा । *V.P.*

51. तच्चानुमानमन्वयिरूपमेव न तु केवलान्वयि । सर्वस्यापि धर्मस्यास्मन्मते ब्रह्मनिष्ठात्यन्ताभावप्रतियोगित्वेनात्यन्ताभावाप्रतियोगि साध्यकत्वरूप केवलान्वयित्य स्यासिद्धेः । नाप्यनुमानस्य व्यतिरेकिरूपत्वम् । *V.P.*

52. संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः । तत्करणं सादृश्यज्ञानम् । *T.S.*

53. गवयनिष्ठगोसादृश्यज्ञानं करणम । गोनिष्ठगवयसादृश्यज्ञानं फलम । *V.P.*

is explained by *Advaitins* as follows: A person who has seen a village-cow in his courtyard when he happens to go the forest and sees a forest-cow, obtains the cognition that this (the forest-cow) is similar to the village-cow. This leads to the certitude that the village-cow is similar to the forest-cow. This is analogical cognition; not the knowledge of the relation between a name *(gavaya)* and the object denoted by it *(the forest-cow)* as contended by *Naiyāyikās*. (III. 9)

In respect of *śabda,* the following points deserve our special attention. *Śakti* is not considered as the desire of *Iśvara* but is regarded as an independent category.[54] The knowledge of purport *(Tātparyajñāna)* is included among the causes of the verbal knowledge. Among the implied denotations the exclusive-non-exclusive implication *(jahadajahallakṣaṇa)* is resorted to explain the statement 'That thou art'. (Some hold that there is no need of implied denotation).[55] Both sentences and words have implied denotation[56] while only words have express denotation. The sentences which refer to the actions to be accomplished as well as those which refer to the things that already exist *(kārya* and *siddha)* are valid.[57] *Vedas* are not eternal. At the commencement of each creation *Īśvara* creates the *Vedas* exactly in the same form in which the same were current in the earlier creation.[58] Only in this sense *Vedas* are called *apauruṣeya.* According to the *Vivaraṇa* view, verbal testimony can generate immediate as well as mediate knowledge; but according to *Vācaspati* it can generate only mediate knowledge. (III. 10-13).

---

54. सा च शक्तिः पदार्थान्तरम् । *V.P.*

55. 'तत्त्वमसि' इत्यादौ तत्पदवाच्यस्य सर्वज्ञत्वादिविशिष्टस्य त्वम्पदवाच्येनान्तःकरणादिविशिष्टैनैक्यायोगात् । ऐक्यसिद्ध्यर्थं स्वरूपे लक्षणेति साम्प्रदायिकाः ।
वयन्तु ब्रूमः 'सोयं देवदत्तः' 'तत्त्वमसि' इत्यादौ विशिष्टवाचकानां पदानामेकदेशपरत्वेऽपि न लक्षणा । *V.P.*

56. लक्षणा च न पदमात्रवृत्तिः किन्तु वाक्यवृत्तिरिति । *V.P.*

57. लोके वेदे च कार्यपराणामिव सिद्धार्थानामप्यपूर्वतया प्रामाण्यम् । *V.P.*

58. अस्माकन्तु मते वेदो न नित्यः । सर्गाद्यकाले परमेश्वरः पूर्वसर्गसिद्धवेदानुपूर्वीसमानानुपूर्वीकं वेदं विरचितवान् *V.P.*

Presumption and non-cognition are accepted as independent evidences following the lines of Bhātta School. According to *Advaitins* even though the cognition of non-existence is perception its means is non-cognition which is an independent *pramāṇa*.[59] There is no rule that when the resultant cognition is perceptual its means also should be the *pramāṇa* of perception. We obtain the perceptual cognition from a statement like 'you are the tenth' wherein the means is verbal. The validity of these *pramaṇās* is intrinsically generated and cognized.[60]

Logical fallacies:

In matters pertaining to the syllogism and other procedures of formal inference, the *Nyāyavaiśeṣika* pattern is accepted with certain changes. Among the logical fallacies, the two varieties of *savyabhicāra* i.e. *asādhāraṇa* and *anupasamhāri* are not necessary since bare co-existence *(kevalānvayī)* type of provans is not accepted. *Virodha* is not a separate fallacy. *Prakaraṇasāṁya* and *Ābhāsasāmya* are added. A proban that can prove both probandum and the absence of it is *prakaraṇasāma*. *Ābhāsasama* is that which is similar to a probans which is accepted as incapable of proving the probandum by both the parties. With some of these changes and the changes consequent on these the *Nyāyavaiśeṣika* scheme of logical fallacies are followed. (IV. 3).

Matabheda:

Different views are held by *Advaita vedātins* on certain details of *Advaita* doctrines. These are discussed in *Siddhāntaleśasaṁgraha* of Shri Appayya Dixita and some other works.

The problem that engaged the attention of many writers and on which different views are expressed is that of

59. अभावप्रतीतेः प्रत्यक्षत्वेऽपि तत्करणस्यानुपलब्धेर्मानान्तरत्वात् । न हि फलीभूतज्ञानस्य प्रत्यक्षत्वे तत्करणस्य प्रत्यक्षप्रमाणतानियतत्वमस्ति । *V.P.*

60. प्रमाणानां प्रागाण्यं स्वत एवोत्पद्यते ज्ञायते च । *V.P.*

Upādānakāraṇa. These views may be stated as follows:[61] (V. 2-7)

(i)	(a) *Śuddha Brahman is Upādāna (māyā is dvārakaraṇa)*	*Saṁkṣepaśarīiraka.*
	(b) Suddha Brahman is Upādāna (māyā is sahakārikāraṇa)	*Vācaspatimiśra.*
(ii)	*Īśvara is upādāna*	*Vivaraṇa.*
(iii)	*(a) Īśvara is upādāna* of ether etc. *Īśvara* and *Jīva* are *Upādāna*	Those who hold *māyā* and *avidyā* to be distinct.
	(b) *Īśvara* is *Upādāna* of ether etc. *Jīva* is of internal organ etc.	A section of the above view.
(iv)	*Brahman is upādāna* of phenomenal world. *Jīva* is of the apparent i.e., dream etc.,	Some
(v)	*Jīva is upādāna* of the entire world	*Dṛṣtisṛṣtivādins.*
(vi)	*Māyā śakti* is *upādāna*	*Siddhāantamuktāvali.*

Of these views, that of *Saṁkṣepaśārīraka* and *Vivaraṇa* are reconciled by interpreting the stand of the former as only the denial of the characteristic of *upādānatva* to *māyaviśiṣta*

---

61. संक्षेपशारीरकृतस्तु ब्रह्मैवोपादानम् । कूटस्थस्य स्वतः कारणत्वानुपपत्तेर्मायाद्वार कारणम्।

वाचस्पतिमिश्रास्तु जीवाश्रितमायाविषयीकृतं ब्रह्म स्वत एव जाड्याश्रयप्रपञ्चाकारेण विवर्तमानतयोपादानमिति माया सहकारिमात्रम् । *S.L.S.*

विवरणानुसारिणस्तु 'यस्सर्वज्ञस्सर्ववित् etc., इति श्रुतेस्सर्वज्ञत्वादिविशिष्टं मायाशबलमीश्वररूपमेव ब्रह्मोपादानमिति । *S.L.S.*

वियदादिप्रपञ्च ईश्वराश्रितमायापरिणाम इति तत्रेश्वर उपादानम् । अन्तःकरणादिकं त्वीश्वराश्रितमायापरिणाममहाभूतोपसृष्टजीवाविद्याकृतभूतसूक्ष्मकार्यमितितत्रोभयो रुपादानत्वम् । *S.L.S.*

यथा वियदादिप्रपञ्च ईश्वराश्रितमायापरिणाम इति तत्रेश्वर उपादानं तथान्तःकरणादिर्जीवाश्रिता- विद्यामात्रपरिणाम इति तत्र जीव एवोपादानम् । *S.L.S.*

कृत्स्नस्य व्यावहारिकप्रपञ्चस्य ब्रह्मैवोपादानम् जीवस्तु प्रातिभासिकस्य स्वप्नप्रपञ्चस्य । *S.L.S.*जीव एव स्वप्नद्रष्टृवत् स्वस्मिन्नीश्वरत्वादिसर्वकल्पकत्वेन सर्वकारणमित्यपि केचित । *S.L.S.*

but not to that of *Īśvaracaitanya.*[62] The view that *Jīva* is the cause of the entire world leads to many complications i.e. denial of *Īśvara,* dislocation of the scheme of bondage and liberation etc. Therefore, that view is not generally accepted.[63] Some of the other views are linked with the question whether *māyā* and *avidyā* are two aspects of one *ajñāna* or distinct. The consensus of opinion is that *Īśvara* is *upādānakārāṇa* of the phenomenal world.

Another important question on which *Advaita* thinkers hold different views is that of the nature of *Īśvara* and *Jīva.* These may be tabulated as follows:[64] (V. 8-15)

---

62. संक्षेपशारीरके शवलोपादानत्वनिराकरणमपि मायाविशिष्टोपादानत्वनिराकरण अभिप्रायम् । न तु निष्कृष्टेश्वररूप चैतन्योपादानत्वनिराकरणपरम् । *S.L.S.* मायाया अपि विम्वभूतेश्वरविशेषणतयोपादानत्वाश्रयकोटौ निवेश एव तत्र दूषितो न तु विम्वत्वविशिष्ट चैतन्यरूपेश्वरस्य तन्निरस्तमिति न तद्विरोधः। (अच्युतकृष्णानन्दः)

63. जीवभावापन्नस्य व्रह्मणस्सर्वोपादानत्वमित्यस्मिन् पक्षे जीवादधिकस्येश्वरस्य अभावादीश्वरस्य सर्वजीवनियन्तृत्वप्रतिपादकश्रुतिस्मृतिन्यायसूत्रभाष्यादिविरोधो वन्ध मोक्षव्यवस्थानुपपत्तिश्च । (अच्युतकृष्णानन्दः)

64. तस्यां (मायायाम्) चित्प्रतिविम्व ईश्वरः । तस्या एव परिच्छिन्नानन्तप्रदेशेष्वावरणविक्षेप-शक्तिमत्स्वविद्याभिधानेषु चित्प्रतिविम्वो जीव इति (प्रकटार्थविवरणे) *S.L.S.*
अविद्यायां तित्प्रतिविम्व ईश्वरः। अन्तःकरणे चित्प्रतिविम्वो जीवः। (संक्षेपशारीरके) *S.L.S.*
मायाप्रतिविम्व इश्वरोऽविद्याप्रतिविम्वो जीव इत्युक्तम् । (तत्त्वविवेके) *S.L.S.*
तत्र (कूटस्थे) कल्पितेऽन्तःकरणे प्रतिविम्वितं चैतन्यं संसारयोगी जीवः। अनवच्छिन्नं चैतन्यं व्रह्म । तदाश्रिते मायातमसि स्थितासु सर्वप्राणिनां धीवासनासु प्रतिविम्वितं चैतन्यमीश्वरः । (चित्रदीपे) *S.L.S.*
तत्रापि प्रतिविम्वो जीवो विम्वस्थानीय ईश्वरः *S.L.S.*
अन्तःकरणावच्छिन्नं चैतन्यं जीवस्तदनवच्छिन्नमीश्वरः । *S.L.S.*
न प्रतिविम्वो नाप्यवच्छिन्नो जीवः । किन्तु कौन्तेयस्य राधेयत्ववदविकृतस्यैव व्रह्मणोऽविद्यया जीवभावः। ...ईश्वरोपि सह सर्वज्ञत्वादिधर्मैः स्वप्नोपलब्धदेवतावज्जीवकल्पित इत्याचक्षते । *S.L.S.*

	Īśvara	Jīva	
(i)	Reflection of consciousness in *māyā (prakṛti)* as a whole.	Reflection of consciousness in *avidyās* which are, as it were, the parts of *māyā*	*Prakaṭārtha-vivaraṇa*

(ii) The author of *Tatvaviveka* also holds the reflection of consciousness in *māyā* and *avidyā* to be *Īśvara* and *Jīva;* but considers *māyā* and *avidyā* to be the two aspects of *prakṛti* instead of the whole and parts.

	Īśvara	Jīva	
(iii)	Reflection of consciousness in *avidyā*	Reflection of consciousness in *antaḥkaraṇa*	*Samkṣepa śāriraka.*
(iv)	(a) Reflection of consciousness in *māyā* qualified by impressions of intellects of all beings.	Reflection of consciousness intellect super-imposed on *kūṭastha*	*Citradīpa*
	(b) Consciousness qualified by *mayā* (like a piece of canvas bleached for painting. The phenomenal world is the painting drawn over it).	Reflection of consciousness in *antaḥkaraṇa* (like the colour clothes drawn for the figures in the painting).	*Citradīpa*
(v)	Prototype	Reflection of consciousness in *ajñāna.*	*Vivaraṇa* .
(vi)	Consciousness not defined by *anthkaraṇa.*	Consciousness defined by *anthkaraṇa.*	
(vii)	Mental construction of *Jīva*	Consciousness assumes the form of *Jīva* on account of *ajñāna* without	

being either defined or reflected (like *Karaṇa,* the son of *Kunti* becoming the son of *Rādhā*)

The above differences which are discussed in *Siddhāntaleśasaṅgraha* of Sri Appayya Dixiṭa and other similar views are due to the different theories regarding the nature of association of consciousness and adjuncts i.e., *avachhedavāda, pratibimbavāda* and *ābhāsavāda* on the one hand and on the other, the differences regarding the nature of *ajñāna* and the role of *ajñāna* and *antaḥkaraṇa.*

Arguments for and against the *avachhedavāda* and *pratibimbavāda* are advanced by later writers. Adherents to one or the other theories have further differed on details. Attempts to combine the features of the two theories have also been made. Thus a number of views have arisen in this respect. *Vivaraṇa* school adopts *ābhāsavāda* in respect of *Īśvara* and *pratibimbavāda* in respect of *Jīva.*

Whether there is only one *Jīva* or there are many is another point that is debated by *Advaita* writers. *Ekajīvavādins* hold three different views[65] :– (V. 16-18)

(i) There is only a single *Jīva* animating only one body. The other bodies are non-animated like the ones seen in dream. The entire universe is illusorily hoisted by the *avidyā* of that *Jīva.* (ii) Hiraṇyagarbha which is a reflection of *Brahman* is the one principal *Jīva.* The other *Jīvas* are reflections of this principal *Jīva.* (iii) There is a single *Jīva* animating many bodies without distinction. *Anekajivavādins* do not agree with any one of these views

65. एको जीवः । तेन चैकमेव शरीरं सजीवमन्यानि स्वप्नदृष्टशरीराणीव निर्जीवानि। तदज्ञानकल्पितं सर्वं जगत् । हिरण्यगर्भ एको ब्रह्मप्रतिबिम्बो मुख्यो जीवः । अन्ये तु तत्प्रतिबिम्बभूताः। एक एव जीवोऽविशेषेण सर्वं शरीरमधितिष्ठति । S.L.S.

and hold that there are many *Jīvas* on account of the adjuncts of *antaḥkaraṇa*. However, this is all from the empirical point of view. From the stand point of the absolute there is no *Jīva* and the question of the number does not arise.

What is the locus of *ajñāna* and how it is withdrawn is also a question that is variously answered.[66] Some hold that *Śuddha Brahman* is the locus as well as the content of *ajñāna*. This *ajñāna* has parts and withdraws partially as and when the true nature is realised. Others hold that the locus in *Jīva* while the content is *Brahman*. Just as the generality dissociates from individual members of the class when those members are destroyed, *ajñāna* dissociates from liberated souls. A third view is that each *Jīva* has an *avidyā*. The phenomenal world is the joint creation of all *avidyas*. Liberation of one will result in the elimination of *prapancha* so far as he is concerned. Another opinion is that each one has his own phenomenal world produced by his *avidyā;* the notion of a common world is erroneous. The last and perhaps more widely accepted view is that

---

66. शुद्धब्रह्माश्रयिविषयकमेवाज्ञानम् । ....अज्ञानस्य सांशत्वात्तदेव कच्चिदुत्पाधौ ब्रह्मावगमोत्पत्तावंशेन निवर्तते । उपाध्यन्तरेषु यथापूर्वमंशान्तैररनुवर्तत इति।

S.L.S.

नाज्ञानं शुद्धचैतन्याश्रयम् । किन्तु जीवाश्रयं ब्रह्मविषयम् । तच्चान्तःकरणप्रतिविम्वरूपेषु सर्वेषु जीवेषु व्यक्तिषु प्रत्येकं पर्यवसिततया वर्तमानमुत्पन्नविद्यं कश्चिज्जहाति नष्टां व्यक्तिमिव जातिः । स एव मोक्षः । अन्यं यथापूर्वमाश्रयति ।

S.L.S.

इतरे तु प्रतिजीवमविद्यानिवृत्तिमभ्युपगम्यैव तदनुवृत्तिनिवृत्तिभ्यां वन्धमुक्तिव्यवस्थां समर्थयन्ते ।। विनिगमकाभावात् सर्वाविद्याकृतः (प्रपञ्चः) अनेकतन्त्वारब्धपटवत्। एकस्यैव मुक्तौ तदविद्यानाश एकतन्तुनाशे पटस्यैव तत्साधारणप्रपञ्चस्यनाशः ।

S.L.S.

तत्तदविद्याकृतो वियदादिप्रपञ्चः प्रतिपुरुषं भिन्नः । शुक्तिरजते त्वया यद् दृष्टं रजतं तदेव मयापीतिवदैक्यभ्रममात्रमित्यन्ये । *S.L.S.*

जीवाश्रिताविद्यानिवहाद्भिन्ना मायैवेश्वराश्रिता प्रपञ्चकारणम् । जीवानामविद्यास्त्वावरणमात्रे प्रातिभासिकशुक्तिरजतादि । *S.L.S.*

Jīva is the locus of *avidyā* while *Íśvara* is that of *māyā*. The former has the power of obscuration and produces the apparent i.e. dream objects etc. the latter is responsible for the phenomenal world. (V. 19).

The *ajñāna* that obscures the objects is held by some to be of two types:[67] one that belongs to the object and projects i.e., the snake over the rope etc., the other is that belongs to *Jīva*. while some others state that there is only one belonging to the object. The obscuring *ajñāna* is set aside when there is *ajñāna* according to *ekajñānavādīns* and it is destroyed according to *anekajñānavādīns*. (V. 21)

The nature of witness self is also variously described in *Advaita* works.[68] In *Kūṭasthadīpa* it is stated that the immutable consciousness which is the substrate of the two bodies–subtle and gross is witness self because it directly superintends the two bodies and is unmodified. The author of *Koumudi* holds that the witness self is some form of the Lord which permits the *Jīva* to be active and to refrain from activity, but which is indifferent and non-active. Some hold that *Jīva* conditioned by *avidyā* is witness self while others hold the *Jīva* conditioned by internal organ to be so. In *Tattvapradīpikā* the substrate consciousness which is identical with *Jīva's* true nature is stated to be witness self. These and similar other descriptions given in *Tattvaśuddhi*, *Nāṭakadīpa* etc., need not be taken as conflicting with each other. Whether the witness self

---

67.द्विविधं विषयावरकमज्ञानम् । एकं विषयाश्रितं रज्ज्वादिसम्भिन्नविक्षेपोपादाभूतं कार्यकल्प्यम् । अन्यत् पुरुषाश्रितमिदमहं न जानामीत्यनुभूयमानम्। *S.L.S.*
नयनपटलवत् पुरुषाश्रितमेवाज्ञानं विषयावरकम् । न तदतिरेकेण विषयगताज्ञाने प्रमाणमस्ति । *S.L.S.*
विषयावगुण्ठनपटवद्विषयगतमेवाज्ञानं तदावरकम् ।

68. देहद्वयाधिष्ठानभूतं कूटस्थचैतन्यं स्वावच्छेदकस्य देहद्वयस्य साक्षादीक्षणान्निर्विकारत्वाच्च साक्षीत्युच्यते । *S.L.S.*
परमेश्वरस्यैव रूपभेदः कश्चिज्जीवप्रवृत्तिनिवृत्त्योरनुमन्ता स्वयमुदासीनस्साक्षी नाम (कौमुद्याम्) *S.L.S.*
सर्वप्रत्यग्भूतं विशुद्धं ब्रह्म जीवाभेदेन साक्षी (तत्त्वप्रतीपिकायाम्) *S.L.S.*

is identical with substrate consciousness, *Īśvara* or *Jīva* does not matter much since the final position of *Advaita* is that all these are non-different from *Brahman* in their true nature. (V. 23).

There are two views regarding creation: *dṛṣtisṛṣtivāda*[69] and *sṛṣtidṛṣtivāda.* According to the former, the phenomenal world has no existence apart from its being perceived; while according to the latter it does exist and is created by *Īśvara* but the nature of its existence cannot be determined either in terms of real or unreal. This peculiar nature is termed *mithyātva.* The dilemma[70] that whether this mithyātva is real or unreal is solved by accepting that it is real but its reality is of the same grade as that of the phenomenal world. In other words *mithyātva* is neither real nor unreal but is also *mithyā* (V. 23-29, 31).

The *Ajñāna* that has obscured the consciousness is destroyed by the knowledge of *Brahman* obtained through the Upaniṣadic passages.[71] This knowledge removes *ajñāna* and disappears by itself. Some are of the opinion that *caramavṛttijñāna* being *jaḍa,* the consciousness presented in *caramvṛtti* destroys *ajñāna.* Removal of *ajñāna* is liberation. The liberated soul is identical with the impartite consciousness. According to those of the *anekajīvavādins* who hold *Īśvara* to be the *bimba,* the liberated soul attains *Īśvarabhāva* until all others are liberated.[72]

---

69. इममेव च दृष्टिसृष्टिवादमाचक्षते । अस्मिंश्च पक्षे जीव एव स्वाज्ञानवशाज्जगदुपादानं निमित्तश्च । दृश्यश्च सर्वं प्रातीतिकम् । देहभेदाच्च जीवभेदभ्रान्तिः। *S.B.*

70. ननु मिथ्यात्वसत्यत्वे ब्रह्मैक्यश्रुतिपीडनम् ।
तन्मिथ्यात्वे तु विश्वस्य सत्यत्वं केन वार्यते ॥ *V.S.M.*
वियदादिप्रपञ्चसमानस्वभावं मिथ्यात्वम् । तच्च धर्मिणः सत्यत्वप्रतिक्षेपकम्। धर्मस्य स्वविरुद्धधर्मप्रतिक्षेपकत्वे हि उभयवादि सिद्धधर्मिसमसत्त्वं तन्त्र न पारमार्थिकत्वम् । *S.L.S.*

71. वाक्यजं ज्ञानमेवाहुर्मूलाज्ञाननिवर्तकम् । *V.S.M.*
हत्वा गोहं विनश्येत् सा । *V.S.M.*
केचित्तु वृत्तिरूपं ब्रह्मज्ञानं नाज्ञानतन्मूलप्रपञ्चनिवर्हकम् । अज्ञानस्य प्रकाशनिवर्त्यत्व नियमेन जडरूपवृत्तिनिवर्त्यत्वायोगात् । किन्तु तदारूढ चैतन्यप्रकाशस्तन्निवर्तकः । *S.L.S.*

72. विम्वेशवादे मुक्तः प्राक् सर्वजीवविमोचनात् ।
ईशो भूत्वा ततः शुद्धे स्वभावे व्यवतिष्ठते ॥ *V.S.M.*

Advaita Vedānta outlined above is a leading school of Indian Philosophy and a vast literature has developed on the system. Great thinkers like Maṇḍana, Sureśvara, Vācaspati, Madhusūdanasarsvatī, Vidyāraṇya and Appayya Dixita have contributed to *Advaita* literature. *Advaita* dialecticians have fought ceaselessly with the *Śūnyavādins* on the one hand and with the *Jagatsatyatvavādins* on the other. In their interpretation of *Upaniṣads, Brahmasūtras* and the *Gītā* also they have faced strong rivals like Rāmānuja and Madhva and a host of writers following these schools. Within the *Advaita* system difference of opinion have arisen with regard to certain details in the course of the development of *Advaita* literature. A precise knowledge of the basic facts of *Advaita* system is indispensable for an advanced study of metaphysical and interpretational problems of *Advaita* Philosophy. It is hoped that the present summary of *Advaita Vedānta* and the text, which follows, will fulfil this need.

Abbreviations

Amd.	Advaitāmodaḥ
C.S.	Citsukhī
Dr. Dr. V.	Dṛgdṛśyaviveka
Kr.C.	Kṛṣṇāvadhūtacaritam
P.D.	Pancadaśī
S.B.	Siddhāntabindu
S.B.	Śānkarabhāṣyam
S.L.S.	Siddhāntaleśasaṇgraha
T.S.	Tarkasaṅgraha
V.P.	Vedāntaparibhāṣā
V.P.S.	Vivaraṇaprameyasaṅgraha
V.S.	Vedāntasāra
V.S.M.	Vedāntasiddhāntasūktimañjarī

N.B. :–The numbers in brackets indicate Chapter and Section of the text.

श्रीकृष्णावधूतपण्डितविरचितम्

अद्वैतनवनीतम्

वयं वन्दामहे भूयः कर्म किं तदकर्मकम् ।
नयत्प्रयोगतो भावे प्रयोगः कर्तृकर्मणोः ॥ १

अद्वैतं मतमवलोड्य कोणकोणं निश्शेषं नवनवनीतमुद्धरिष्ये ।
धीमन्तोऽनिलसमये विहर्तुमन्तःकाङ्क्षन्तरसपदि सुखं गिलन्तु सन्तः॥ २

प्रक्रिया च प्रमेयञ्च प्रमाणं दोष उच्यते।
क्वचिदुक्तानुवादोऽपि सङ्गत्या मतभेदतः ३

अथ प्रक्रियानिरूपणम्

१. ''पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवी'' ति श्रुतिः। ब्रह्मणो मृलप्रकृत्यविष्टानभूतः पाद एकः । पादत्रयन्त्वमृतरूपं शुद्धं निर्धर्मिकम् ।

२. अनादेर्मूलप्रपृतेः प्रधानमव्यक्तमिति नाम । मायाऽविद्या तामसी राजसी सात्विकत्येतत्समष्टिरूपा ।

३. अनादयोऽनन्तजीवास्स्वस्वकर्मवासनादिभिस्सह जतुपिण्डे सुवर्णरेणव इव प्रकृतौ लीनास्सन्तिं ।

४. सृष्टेः पूर्वं मायायां प्रतिबिम्बितं शुद्धब्रह्मचैतन्यमीश्वरः । स एवाव्याकृतोऽनादिस्सर्वज्ञोऽन्तर्यामी जगत्स्रष्टा स्वप्राधान्येन निमित्तकारणम् । स एव पूर्णरूपस्तामस्याऽवच्छिन्नस्सन् जगदुपादानं तन्तोरूर्णनाभिवदप्राधान्येन ।

५. अविद्यात्वन्तःकरणादिरूपेणानेकविधा । तस्यां प्रतिबिम्बितचैतन्य रूपा जीवाश्चानेकविधाः।

६. समष्टिरूपा प्रकृतिरीश्वरस्य कारणशरीरम् । व्यष्टिरूपाऽविद्या जीवानां कारणशरीरम् । जीवेश्वरयोः कारणशरीरमेवानन्दमयकोशः । तत्रैव जीवस्य सुषुप्तिः ।

७. ''जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवती'' ति श्रुतिरनादित्वे मानम् ।

८. अविद्याजन्यान्यन्तःकारणानि । तदवच्छिन्नो जीव इत्यनेक जीववादिनः ।

९.तामसीप्रकृतिरीश्वरस्येक्षणवशाद्विपशक्तिरावरणशक्तिरिति द्विविधा जाता । विक्षेपशक्तेस्सकाशात्तदवच्छिन्नेश्वरात्मन आकाशस्सम्भूतः । आकाशाद्वायुः । वायोरग्निः। अग्नेरापः । अद्भ्यःपृथिवी । एतान्यपञ्चीकृतानि सूक्ष्मभूतानि । तानि पञ्चीकृत भूतानां मात्राणि । सर्वत्रापि गुणत्रयस्य प्राधान्याप्राधान्याभ्यमनुप्रवेशोऽस्त्येव ।

१०. सूक्ष्मभूतानां सत्त्वांशसमष्टयाऽन्तःकरणम् । सत्त्वांशव्यष्टय श्रोत्रत्वक् चक्षुर्जिव्हाघ्राणानि पञ्चेद्रियाणि । अन्तःकरणं मनोबुद्धिरहङ्कार श्चित्तश्चेति चतुर्विधम् । सूक्ष्मभूतानां रजोंशसमष्टया प्राणादिपञ्चकं रजोगुणव्यष्टया वागादिपञ्चकर्मेंद्रियाणि च जातानि । ज्ञानेन्द्रियपञ्चकं कर्मेंद्रियपञ्चकं प्राणपञ्चकं मनो बुद्धिश्चेति सप्तदशात्मकं लिङ्गाख्यं सूक्ष्मशरीरं भोगसाधनम्। तत्र जोवेश्वरयोरवस्थितिर्जीवस्य स्वप्नावस्था।

११. प्राणमयमनोमयविज्ञानमयकोशास्सन्ति ।

१२. सूक्ष्मभूतेभ्यस्तमोगुणप्रधानानि पञ्चमहाभूतान्यजायन्त। पञ्चीकृतेभ्यस्तेभ्यो ब्रह्माण्डं चतुर्दशभुवनानि चतुर्विधस्थूलशरीरमन्नादिभोग्य जातम् । स्थूलशरीरे जीवस्य जाग्रदवस्था । ईश्वरस्य सर्वत्र जागृदवस्थैव। अयमेवान्नमयकोशः ।

१३. तथा चात्मनस्समष्ट्युपाधिनेश्वरत्वं व्यष्ट्युपाधिना जीवत्वम्। समष्टिकारणशरीरोपाधिक ईश्वरः । अस्य शरीराभिमानो नास्ति।

योगिभिरुपास्यः। एतदुपासनाशक्तैस्समष्टिसूक्ष्मशरीरोपाधिक ईश्वर उपास्यः । तस्य हिरण्यगर्भस्सूत्रात्मा मुख्यप्राण इति नामानि । तस्यापि शरीराभिमानो नास्ति। एतदुपासनाशक्तानां समष्टिस्थूलोपाधिक उपास्यः । तस्य विराड् वैराजो वैश्वानर इति नामानि । अस्मिञ्शरीरेऽपीशस्याऽभिमानो नास्ति। सकलजीवशरीराणामेकीभूयास्य शरीरत्वेनावस्थानाव्द्यावर्तनीयप्रतियोग्यभावात्। एतदुपासनाशक्तानां जीवानामनुग्रहार्थं राजससात्विकतामसमूर्तीस्स्वीकृत्य ब्रह्मविष्णुरुद्रनामको बभूव। तासु मूर्तिषु दुष्टनिग्रहशिष्टपरिपालनार्थमभिमानोऽस्ति। तदुपासनाशक्तानां मत्स्यकूर्मादिमूर्तिधरो बभूव । तत्राऽप्यभिमानोऽस्ति।

१४. अथ जीवत्वसिद्धिः । आत्मैव व्यष्टिकारणशरीरोपाधिको जीवः प्राज्ञः पारमार्थिकोऽविद्यावाच्छिन्नोऽन्तःकरणप्रतिविम्बित इत्युच्यते। व्यष्टिसूक्ष्मशरीरोपहितस्य तस्य तैजसस्स्वाप्निकः प्रातिभासिक इति नामानि । व्यष्टिस्थूलशरीरोपहितस्य तस्य विश्वो व्यावहारिकश्चिदाभास इति नामानि । जीवस्य कर्मकर्तृत्वेन शरीरत्रयेऽपि स्वीयत्वेन सुखदुःखाद्यनुभवजनकोऽभिमानोऽस्ति । अयमध्यारोपो विक्षेपशक्तिकार्यम्।

१५. आवरणशक्तिस्त्वीश्वरं ब्रह्मज्ञानिनञ्च विहायान्यानावृणोति । आवरणं द्विविधम्। असत्त्वावरणमभानावरणञ्चेति । वस्तु नाऽस्तीति व्यवहारहेतुराद्यम्। न भातीति व्यवहारहेतुर्द्वितीयम् । आवरणशक्तिकार्यं संसारः । उभयमपि तत्त्वज्ञाननाश्यम् । जड आवरणकार्याभावान्नावरण शक्तिः प्रसरति ।

१६. तत्त्वज्ञानं द्वेधा । परोक्षमपरोक्षमिति । गुरुमुखाच्छ्रवणं परोक्षम् । तेना सत्त्वावरणनाशः । मननादिभिर्निश्चितमात्मैक्यज्ञान अपरोक्षम् । तेनाभानावरणनाशः ।

१७. आवरणं विक्षेपोऽज्ञानं परोक्षज्ञानमपरोक्षज्ञानमनर्थनिवृत्तिरानन्दावाप्तिरिति जीवस्य सप्तावस्थाः ।

१८. शुक्तौ रजतवद्ब्रह्मणि प्रपञ्चो नास्तीति निषेधोऽपवादः । तेन ब्रह्माहमिति ज्ञानं जायते । तदा जीवन्मुक्तो भवति ।

१९. इदन्तु बोध्यम् । प्रपञ्चो द्विविधः । आत्मानात्मा चेति । आत्मा निष्क्रिय आकाशवदसङ्गो निरंशः परिपूर्णचैतन्यं सदानन्दरूपो निर्विकार अकर्ताऽकारयिता निर्गुणोऽद्वयः परमात्मा ब्रह्म स्वप्रकाशो वियदादिप्रपञ्चाधिष्ठानश्च । अनात्मा प्रकृतिः । सा च कार्यरूपेणानेकविधा।

२०. आत्मा एक एवानात्मकार्योपाधिभिरनैकैरनेके जीवा बभूव। स एव मायावच्छिन्न ईश्वरः । स चैकोऽप्यनात्मकार्येष्वनेकेष्वनुप्रवेशादनेक विधः । अयमच्छिन्नपक्षः ।

२१. प्रतिविम्बपक्षे त्वनेकेष्वन्तःकरणेषु प्रतिबिम्बतस्सन्नेक एवात्मानेक जीवरूपो बभूव ।

२२. मायायां प्रतिविम्बित ईश्वरो यथाऽऽदित्यस्समुद्रादिषु प्रतिबिम्बितस्तथा । चलनादिप्रतिविम्बधर्मा आदित्य इव कर्तृत्वादयो जीवेश्वरधर्मा विम्बे कूटस्थ आत्मनि न सन्ति ।

२३. ईश्वरस्य शरीरत्रयाणां समष्ट्युपहितत्वेन व्यष्टिजीवशरीरेऽपि स्थितिरस्ति । जीवेश्वरौ कारणशरीरगतौ कूटस्थौ । परमात्मा तु सर्वकूटस्थः ।

२४. जीवस्त्रिविधः पारमार्थिको व्यावहारिकः प्रातिभासिक इति। सुषुप्त्यभिमानी पारमार्थिकः । जाग्रदभिमानी व्यावहारिकः । स्वप्नाभिमानी प्रातिभासिकः । पारमार्थिके जीवे व्यावहारिकः कल्पितः । तत्र प्रातिभासिकः कल्पितः । यथा जले तरङ्गस्तरङ्गे फेनः । कल्पितात्मनां मिथ्यात्वम् । जलगुणास्तरङ्गफेनयोरिव कूटस्थ जीवगुणा व्यावहारिके तद्द्वारा प्रातिभासिकेऽपि भान्ति । यथा मठघटाद्याकाशो महाकाश एव तथेश्वरः पारमार्थिकश्च कूटस्थात्मैव।

२५. अलौकिकपारमार्थिकं शुद्धब्रह्मचैतन्यम् । लौकिकपारमार्थिकन्तु आरोपेप्रधानं रजतप्राज्ञादि । अतः पारमार्थिकं द्विविधम् ।

२६. आत्मनो निर्विशेषत्वान्निरंशत्त्वात् स्वगतभेदसजातीयभेदौ न स्तः । अद्वितीयत्वाद्विजातीयभेदोऽपि नास्ति ।

२७. आत्मा जीवानामवस्थात्रयं व्यापारमवस्थावतो जीवांश्च साक्षादद्रष्ट्रत्वात्साक्षी । ईश्वरस्यान्तर्यामित्वं नामादित्यवत्सन्निधिमात्रेण सर्वकार्यानुकूलत्वम् । कर्मणां फलस्य च स्पर्शो नास्ति ।

२८. सृष्टिर्द्विविधा । ईश्वरसृष्टिर्जीवसृष्टिरिति । व्यावहारिकं वियदादीश्वरसृष्टम् । तदधिष्ठानं पारमार्थिकं ब्रह्मैव । प्रातिभासिकं शुक्तिरूप्यादि जीवसृष्टिः । तदधिष्ठानं वियदादि । व्यावहारिकप्रातिभासिक योरध्यासससाम्येऽपि सत्ताभेदाद्भेदः ।

२९. सत्ता त्रिविधा । पारमार्थिकी व्यावहारिकी प्रतिभासिकीति । शुक्ति रूप्यादेरधिष्ठानज्ञानाव्यवहितोत्तरक्षण एव नाशात्तत्सत्ता प्रातिभासिकी । व्यावहारिक पञ्चकोशादेरधिष्ठानब्रह्मज्ञानानन्तरमपि जीवन्मुक्त्यवस्थायां प्रारब्धकर्मक्षयपर्यन्तं दग्धपटवत्स्थितत्वात्तत्सत्ता व्यवहारिकी । अन्यथा गुरुशिष्याभावप्रसङ्गः । आत्मसत्तयैव सत्तावदपि कोशपञ्चकमात्मानमाच्छादयत्यादित्यसत्तयैव सत्तावन्मेघस्सूर्यमिव ।

३०. जीवानां पञ्चकोशानाञ्च न संयोगसमवायादिः । आत्मनो द्रव्यत्वाभावात् । किन्त्वध्यास एव सम्बन्धः ।

३१. कर्मसुखदुःखादिकं मानसवृत्तिः । पुण्यं पापं मिश्रञ्चेति त्रिविधं कर्मप्रवाहतोऽनादि । कर्तृत्वं करणस्यैव । कर्ताऽहमित्याध्यासिकमा त्मनि कतृत्वम् । मनोवाक्कायभेदात्करणं त्रिविधम् । तत्प्रेरकं रागद्वेषादि। सर्वा अपि वृत्तयोऽन्तःकरण धर्माः ।

३२. अज्ञानं तत्कार्यञ्चानिर्वचनीयं तत्त्वज्ञानबाध्यम् । ज्ञानं द्विविधम् । स्वरूपज्ञानं वृत्तिज्ञानञ्चेति । सुषुप्तावज्ञानप्रकाशकं स्वरूपज्ञानम्। तदानीमेवास्य प्रकाशः जाग्रत्स्वप्नयोर्विषयप्रकाशकं वृत्तिज्ञानम् । जाग्रत्स्वप्नयोरेवास्य प्रकाशः । सुषुप्तौ वृत्तयो न सन्ति । बुद्धिरूपवृत्तेरन्तःकरणवृत्तित्वेन जडत्वेऽपि स्वरूपज्ञानेन

प्रविष्टत्वात् ज्ञानमिति व्यवहारः । कार्यभूतान्तःकरणवृत्तयो जाग्रदादौ ब्रह्मानन्दात्मकं सुषुप्त्यानन्दमावृण्वन्ति । स्वसंवेद्यं स्वरूपसुखम् ।

३३. तत्त्वज्ञानप्रतिबन्धकानि त्रीणि । संशयभावनाऽसम्भावना विपरीतभावना चेति । श्रुतिभिरुपदिश्यमानमात्मतत्त्वमनेकविधं न वेति संशयः । स च गुरु मुखाच्छ्रवणेन नश्यति । सत्यत्वेन प्रमाणसिद्धे जीवेश्वरप्रपञ्चभेदे कथमद्वैतं घटत इति बुद्धिरसम्भावना । तस्या मननेन नाशः । मननेप्यनाद्यविद्यावासनया जगत्सत्यत्वप्रतीतिर्विपरीतभाव ना। सा च ब्रह्मैकाकारप्रत्ययप्रवाहरूपनिदिध्यासनेन नश्यति । वृत्तौ प्रविष्टेन स्वरूपनानाद्यप्यज्ञानं तत्कार्यञ्च नश्यति । आत्माज्ञानमप्यात्माकार वृत्तिप्रविष्टेन तेनैव। न तु केवलवृत्तिज्ञानेन। ननु सुषुप्तौ स्वरूपज्ञानस्याज्ञानप्रकाशकत्वेन विरोधाभावात् कथमज्ञानविवर्तकत्वमिति चेन्न । यथादित्यकिरणस्य तृणादिप्रकाशकत्वेन तदविरोधेऽपि सूर्यकान्तप्रविष्टस्य तस्य दाहकत्वेन तृणादिविरोधित्वं तथा वृत्तिप्रविष्टस्वरूप ज्ञानस्याज्ञानविरोधित्वात् वृत्तिज्ञानमप्यज्ञानं तत्कार्यं नाशयित्वा स्वयं निवर्तते । वृत्तिनाशे सति वृत्तौ प्रतिबिम्बितस्वरूपज्ञानं बिम्बभूत स्वरूपज्ञानमेव गच्छति । ततोऽद्वैतमात्मस्वरूपमेवाऽवशिष्यते।

३४. मुक्तिर्द्विधा सदेहमुक्तिर्विदेहमुक्तिश्चेति । सालोक्यं सामीप्यं सारूप्यमित्याद्या त्रिविधा । कैङ्कर्यादयः कारणम् । विदेहमुक्तिस्सायुज्यम्। अस्यैक्यापरोक्षः कारणम् ।

३५. अनादिपञ्चकन्तु विशुद्धात्मा ईशो जीवः प्रकृतिरेतेषां भेदश्चेति। अविद्याचिद्योगोऽपि षष्ठोऽनादिरिति केचित् । तस्य जीवपदेनैव ग्रहणात्पृथङ्नोक्तम् ।

३६. चित्सुखात्मकं ब्रह्मबिम्बं निराकारमपि मायायास्साकारत्वेन तत्प्रतिबिम्बितेश्वरस्य साकारत्वम् । एवञ्जीवस्यापि ।

३७. ननु जगतस्सकृत्सृष्टिर्वा सृष्टिप्रवाहो वा । आद्य ''अनाद्यनन्तं जगदेतदीदृक् सृजत्यवत्यत्ति मुर्हुर्महेश्वर'' इति श्रुतिविरोधः ।

द्वितीयेत्वद्वैतहानिः । किञ्चेश्वरस्य विदेहमुक्तिरस्ति न वा । नाद्यः । श्रुत्यनुक्तत्वात् । फलबलात्कल्प्यत इति चेत् पूर्वोक्तश्रुतिविरोधः । न द्वितीयः । अद्वैतहानेरिति चेदस्योत्तरमन्यत्र द्रष्टव्यम् ।

॥ इति श्रीकृष्णावधूतपण्डितविरचिते अद्वैतनवनीते प्रक्रियानिरूपणं नाम प्रथमगोलकं ॥

अथ प्रमेयनिरूपणम्

१. पदार्थो द्विविधः । दृग्दृश्यभेदात् । दृगेव परमात्मा ब्रह्म चिद्रूपः पारमार्थिकसन् । स द्विविधः । शुद्धश्शबलश्चेति । शबलस्योपाधिनाशे शुद्धमेकमद्वितीयमित्युच्यते ।

२. शबलं द्विविधम् । इशो जीवश्चेति । ईशो द्विविधः । ईश्वरस्साक्षी चेति । मायावच्छिन्नचैतन्यमीश्वरः । मायोपाधिकचैतन्यं साक्षी । ईश्वरनियतमुभयमप्येकम् । मायाया एकत्वात् । अनादित्वादनादि च ।

३. अविद्यासम्बद्धचैतन्यञ्जीवः । स एव जीवकूटस्थो हिरण्यगर्भ इति । अविद्याजन्यान्तःकरणेषु तत्प्रतिबिम्बभूता अनेके जीवाः । महत्त्वाख्यं हिरण्यगर्भशरीरमीश्वरस्सृष्टवान् । ततो हिरण्यगर्भ एव जीवानां शरीराणि वियदादिप्रपञ्चञ्च सृष्टवान् । अयमेकजीववादपक्षः । अनेकजीवपक्षेत्वविद्यैकदेशभूतान्तःकरणेष्ववच्छिन्ना अनेके जीवाः । उभयपक्षेप्यवच्छिन्नचैतन्यञ्जीवः । उपहितचैतन्यं साक्षि । पृथक् प्रतिजीवनियतम् । उभयमप्यनेकम् । अन्तःकरणानामनेकत्वात् । कार्यान्वयिव्यावर्तकं विशेषणमवच्छेदः । रूपवान् घट इत्यत्र रूपम् । कार्यानन्वयि व्यावर्तकमुपाधिः । कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रमित्यत्र कर्णशष्कुली ।

४. जीवचैतन्यं त्रिविधम् । प्रमातृचैतन्यं प्रमाणचैतन्यं प्रमेयचैतन्यश्चेति। प्रमाता जीवः । अन्तःकरणवृत्त्यवच्छिन्नचैतन्यं प्रमाणचैतन्यम् । घटादिविषयावच्छिन्नचैतन्यं प्रमेयचैतन्यम् ।

५. तथाचेश्वर ईश्वरसाक्षि जीवो जीवसाक्षि प्रमाण चैतन्यं प्रमेयचैन्यश्चेति शबलं षड्विधम् ।

६. ईश्वरस्यान्तःकरणाभावादन्तःकरणवृत्तिरपि नास्तीति तस्य प्रमाणचैतन्यं न कल्पनीयम् । सर्वेषां जीवानामीश्वरस्य च स्वप्रकाशत्वं विभुत्वञ्च ।

७. दृग्विषयं दृश्यम् । एकस्यैव ब्रह्मणः कर्तृकर्मभावानभ्युपगमात्तत्र न दृश्यत्वम् । तदेव सदसद्विलक्षणत्वादनिर्वचनीयम् ।

८. तद्विविधम् । प्रातिभासिकं व्यावहारिकश्चेति । प्रातिभासिकं शुक्तिरूप्यादि । स्वाप्नं गजादिच । तच्च तूलाविद्याकार्यमित्येकः पक्षः । मूलाविद्याकार्यमित्यपरः । आद्येऽधिष्ठानतत्त्वज्ञानेन सोपादानकनाशरूपो बाधः । द्वितीये तेन रजतादिमात्रनिवृत्तिः । मुद्गरप्रहारेण घटस्येव । नतूपादानस्य मूलज्ञानस्य । तस्य ब्रह्मसाक्षात्कारनिवर्त्यत्वात् । तथैव विवरणोक्तेः । मूलाविद्यातदुपादानकमर्थ क्रियाकारि वियदादि व्यावहारिकम् ।

९. उभयमपि षड्विधम् । द्रव्यगुणकर्मधर्मशक्त्यभावभेदात् ।

१०. गुणाश्रयत्वं परिणामित्वं वा द्रव्यत्वम् । मूलप्रकृत्यन्तःकरणेन्द्रिय प्राणभूतकालदिक्तमांसीत्यष्टौ द्रव्याणि । अनादिर्मूलप्रकृतिर्द्वेधा । मायाऽविद्या चेति । अन्तःकरणञ्चतुर्धा । मनो बुद्धिरहङ्कारश्चित्तमिति। इन्द्रियं द्विविधम् । ज्ञानेन्द्रियं कर्मेन्द्रियश्चेति । श्रोत्रत्वक्चक्षूरसनघ्राणानि पञ्च ज्ञानेन्द्रियाणि । वाक्पाणिपादपायुपस्थानि पञ्च कर्मेन्द्रियाणि । प्राणो द्विविधः । मूलप्राणा उपप्राणा इति प्राणापानव्यानोदानसमाना मूलप्राणाः । नागकूर्मकृकलदेवदत्तधनञ्जया इति पञ्चोपप्राणाः । वियद्वायुस्तेजस्सलिलं पृथिवीति पञ्चभूतानि । कालस्सादिः क्षणाद्यनेकविधः

''सर्वे निमेषा जज्ञिर'' इत्यादिश्रुतेः। कालदिशौ सर्वाधारसर्वकार्यनिमित्ते। दिगाकाशयोर्देशपरिच्छेदाभावद्विभुत्वम्। प्रत्यक्षप्रतिबन्धकं नीलरूपवत्तमः। पृथिवीतमोंऽशेन जन्यत्वाद्रूपम्।

११. शब्दस्पर्शरूपरसगन्धसंख्यापरिच्छेदाकारसंयोगसादृश्यस्नेहगुरुत्व लघुत्वकठिणत्वमृदुत्ववेगज्ञानसुखदुःखेच्छाक्रोधकृतिपुण्यपापसंस्कारलज्जावी र्यधैर्यवलदयाभयानि गुणा द्वात्रिंशत्।

१२. शद्वादयः पञ्च श्रोत्रादिपञ्चेन्द्रियग्राह्याः। तत्र शब्द आकाशे शब्दस्पर्शौ वायौ। शब्दस्पर्शरूपाणि तेजसि। शब्दस्पर्शरूपरसा जले। शब्दस्पर्श रूपरसगन्धाः पृथिव्याम्। वाय्वादीनामाकाशजन्यत्वेन पितुर्गुणा पुत्र इति न्यायात्। न च पञ्चानां भूतानां पञ्चीकरणात् पञ्चापि गुणाः पञ्चभूतेष्विति वाच्यम्।स्थूलभूतानामेव पञ्चीकरणात्।

१३. एकत्वादिस्सङ्ख्या। परिच्छेदस्त्रिविधः। देशतःकालतो वस्तुत इति। देशतः परिच्छेद एव परिमाणम्। देशतः कालतः परिच्छेद एव परत्वापरत्वे। वस्तुतः परिच्छेदस्सद्वितीयत्वम्। ब्रह्मणस्त्रिविधपरिच्छेदो नास्तीति विभुत्वम्। आकारवतामनेकत्व आकारो जातिः। तस्यैकत्वे गुण एव। यथा घटत्वमाकाशत्वम्। तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वं सादृश्यम्। स्नेहादिषट् पृथिवीजलयोः। वेगो मूर्तवृत्तिः। क्रियावन्मूर्तम्।

१४. ज्ञानादयो दयान्ता मनोमात्रगुणाः ज्ञानमन्तःकरणवृत्तिः। सा चतुर्विधा। संशयो निश्चयो गर्वस्स्मृतिश्चेति। एता मन आदीनां क्रमादवृत्तयः। अतिनिर्मलत्वाच्चैतन्यावच्छेदकत्वाज्ज्ञानत्वोपचारः। अन्तःकरणस्य सादित्वेन सावयवत्वात्परिणामात्मिका वृत्तिरस्ति।

१५. एकस्मिन् विरुद्धानेकधर्मप्रकारकज्ञानं संशयः। भावाभावयोरेव विरोध इति नियमः। असामानाधिकरण्यस्यापि विरोधत्वात्। निश्चयोऽनुभवः। स द्विविधः। यथार्थायथार्थभेदात्। तद्वति

तत्प्रकारको यथार्थः । विशेष्यावृत्तिप्रकारकस्त्वयथार्थः । उभयमपि पञ्चविधम् । प्रत्यक्षानुमित्युपमितिशाब्दोपपादकज्ञानभेदात् ।

१६. प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकञ्चेति । विशेषणविशेष्यसंसर्गानवगाहिज्ञानमाद्यम् । तत्त्वमसीत्यादिवाक्यजन्यं प्रत्यक्षं ब्राह्मम् । तात्पर्यमात्रविषयस्य भानं निर्विकल्पकमिति विवरणे । तशमस्त्वमसीत्यादौ शब्दजन्यज्ञानस्यापि प्रत्यक्षत्वदर्शनान्द्रियकरणकमेव प्रत्यक्षमिति न वियमः । अभावज्ञानस्य प्रत्यक्षत्वेप्यनुपलब्धिकरणकत्वात्। अत एवानुपलब्धिप्रमाणजन्याभावज्ञानस्य प्रत्यक्षेऽन्तर्भावादनुभवस्य पञ्चधा विभागः । सप्रकारकं सविकल्पकम् । अयं घट इति ज्ञानम् । सुखादिप्रत्यक्षन्त्विन्द्रियाजन्यम् । मनसोऽनिन्द्रियत्वात् ईश्वरस्य प्रत्यक्षं प्रमैव । तच्च नेन्द्रियजन्यम्। ईश्वरस्येन्द्रियाभावात्।

१७. आरोपितयोर्भावाभावयोः प्रत्यक्षमयथार्थम् । तदेवान्यथाख्यातिरुच्यते । आरोपितस्य निरुपादानकत्वादारोप्यसन्निकर्षस्थले सर्वत्रान्यथाख्यातिरेवेति पूर्वैर्व्यवस्थापितत्वात् । आधुनिकास्तु व्यावहारिकप्रातिभासिकयोरपि भावाभावयोर्जीवानाश्रिताविद्यैवोपादानमनिर्वचनीयत्वसाम्यादित्याहुः ।

१८. अनुमिनोमीत्यनुव्यवसायसिद्धं ज्ञानमनुमितिः । पर्वतो वह्निमानिति । उपमिनोमीत्यनुव्यवसायसिद्धं ज्ञानमुपमितिः । यथा मदीया गौरनेन गवयेन सदृशीति ज्ञानम् । शब्दात् प्रत्येमीत्यनुव्यवसाया सिद्धं शाब्दं ज्ञानम् । इदं कल्पयामीत्यनुभवसिद्धमुपपादकज्ञानम् ।

१९. अहमनेनोत्कृष्ट इति ज्ञानं गर्वः । संस्कारजन्या स्मृतिः । सा च यथार्थाऽयथार्थेति द्विविधा । घटं स्मरामीत्याद्यनुव्यवसायसिद्धा । तत्त्वसाक्षात्कारानन्तरं सर्वस्य बाधेपि संसारदशायां विषयस्याबाधात् तज्ज्ञानं प्रमा । संसारदशायामेव बाधश्चेदप्रमा । धारावाहिकबुद्धिस्थले तादृशवृत्तिरूपं ज्ञानमेकमेव । वृत्तेरस्वविरोधिवृत्त्युत्पत्तिपर्यन्तं स्थायित्वात् । अतो न ज्ञानं क्षणिकम् । स्मृतिधारादर्शनात्संस्कारोपि न क्षणिकः ।

२०. कर्म चलनम् । धर्मो विशेषणं घटत्वादि । अनुगतमननुगतं व्याप्यं व्यापकञ्च । सम्बन्धोपि धर्म एव । कार्यस्यानुकूला प्रतिकूला च शक्तिरतीन्द्रिया ।

२१. अभावश्चतुर्विधः । प्रागभावो ध्वंसोऽत्यन्ताभावोऽन्योन्याभाव श्चेति प्रागभाव उपादाननिष्ठः । प्रागभावध्वंसः प्रतियोगिस्वरूपः । प्रतियोगिनाशे तस्यापि नाशः । मुद्गरप्रहारादिना घटध्वंसः । उपादाननिष्ठोऽधिकरणस्वरूपः । तन्नाशे ध्वंसस्यापि नाशः । घटध्वंसध्वंसेपि नष्टो घट इत्येव प्रतीतेर्घटध्वंसध्वंसस्यापि घट एव प्रतियोगीति न घटोन्मज्जनापत्तिः । चैतन्यरूपनित्याधिकरणगतध्वंसस्या-धिष्ठानचैतन्यव्यतिरेकेण नित्यता नास्तीति चैतन्यस्वरूपता । एवमारोपितशुक्तिरूप्यादिध्वंसोपीदमवच्छिन्नचैतन्यरूपमेव । कालत्रयेप्य-भावोऽत्यन्ताभावः । स च प्रामाणिकप्रतियोगिकोऽप्रामाणिकप्रतियोगिकश्च। आद्यो घटाभावः । द्वितीयश्शशशृङ्गाद्यभावः । द्विविधोपि ध्वंसप्रतियोगी। घटः पटो नेति प्रतीतिसाक्षिकाभावोऽन्योन्याभावः । स एव पृथक्त्वं विभागो भेद इत्युच्यते । अयमनादिस्सादिश्च । ध्वंसप्रतियोगी । अविद्याया- निवृत्तौ तत्परतन्त्राणां सर्वेपां निवृत्त्यवश्यंभावात् । भेदो द्विविधः । सोपाधिको निरुपाधिकश्चेति । आद्यस्तु घटाद्युपाधिभेदादाकाश भेदः । अन्तःकरणाद्युपाधिभेदाद् ब्रह्मभेदः । द्वितीयस्तु घटपटादिभेदः। अद्वितीये ब्रह्मणि प्रपञ्चस्य कल्पितत्वाद् ब्रह्मप्रपञ्चयोर्न पारमार्थिकभेदः।

२२. कार्यं प्रागभावप्रतियोगि । कार्यनियतपूर्ववृत्ति कारणम् । तद्द्विविधम् । उपादानं निमित्तञ्चेति । उपादानं द्विविधमधिष्ठानं परिणामि चेति । जगदाकारेण परिणममाणाविद्याधिष्ठानत्वाद् ब्रह्मणो जगदुपादानत्वम् । द्वितीयमविद्यातन्तुकपालादि । अपरिणामित्वे सति कारणत्वं निमित्तत्वम् । ईश्वररूपेण जगत्स्रष्टृत्वाद् ब्रह्मणो निमित्तत्वञ्च। घटादिकं प्रति दण्डकुलालादिकञ्च ।

२३.असाधारणधर्मो लक्षणम् । तद् द्विविधम् । स्वरूपं तटस्थमिति। सत्यं ज्ञानमनन्तं ब्रह्मेतिश्रुतेस्सत्यज्ञानादिस्वरूपलक्षणम् । आनन्दो

विषयानुभवो नित्यत्वश्चेति धर्मा अपृथक्त्वेपि चैतन्यात्पृथगिवावभासन्त इति पद्मपादाचार्योक्तेः । सास्नादिमत्वं गोः । यावल्लक्ष्यमनवस्थितं सद् व्यावर्तकं तटस्थलक्षणम् । यथेश्वरस्य जगज्जन्मादिकारणत्वम् । यथा च पृथिव्या गन्धवत्त्वम् । अस्मन्मते न्यायमते चोत्पत्तिकाले गन्धाभावात् । न्यायमते महाप्रलये परमाणुगन्धानङ्गीकारात् । ब्रह्मणो निखिलजगदध्यासाधिष्ठानत्त्वरूपोपादानत्वञ्च तटस्थम् ।

२४. लक्षणदोषास्त्रयः । अतिव्याप्तिरव्याप्तिरसम्भव इति । अलक्ष्येपि लक्षणसत्त्वमतिव्याप्तिः । लक्ष्यांशे लक्षणाभावोऽव्याप्तिः । लक्ष्यसामान्ये लक्षणाभावोऽसम्भवः । यथा गोः शृङ्गित्वं शबलत्वमेकशफमात्रत्वञ्च।

२५. चिदेकमेव नित्यम् । तद्भिन्नमनाद्यपि सर्वं ब्रह्मज्ञानबाध्यत्वादनित्यम् ॥

॥ इति श्रीकृष्णावधूतपण्डितविरचिते अद्वैतनवनीते
प्रमेयनिरूपणं नाम द्वितीयगोलकम् ॥

अथ प्रमाणनिरूपणम् ।

१. प्रमाकरणं प्रमाणम् । प्रत्यक्षानुमानोपमानागमार्थापत्त्यनुपलब्धय इति षट्प्रमाणानि ।

२. तत्र प्रत्यक्षप्रमाकरणं प्रत्यक्षम् । तत्तदाकारवृत्त्यवच्छिन्नचैतन्यस्य तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्नचैतन्याभिन्नत्वं ज्ञानगतप्रत्यक्षत्वम् । न तु वृत्तिः प्रत्यक्षप्रमा। अविशिष्टचैतन्यस्याजन्यत्वेपि वृत्ते- र्जन्यत्वात्त द्विशिष्टचैतन्यस्य चतुरादिजन्यत्वम् । प्रमातृचैतन्यमेव वृत्त्यवच्छिन्नम् । वृत्तिस्तु चक्षुरादिद्वारा बहिर्गत्वा विषयाकारेण परिणमते । तदा योग्यविषयचैतन्यस्य वृत्तिचैतन्यस्याप्यैक्यं भवति । तदेव प्रमातुः प्रत्यक्षम् । वृत्तिविषययोरेकदेशीयत्वमेककालिकत्वञ्च तदवच्छिन्नचैतन्याभेदे प्रयोजकम् । अनुमितावुपनीतभाने च विशेष्यांश एवापरोक्षम्।

३. संयोगस्संयुक्ततादात्म्यं संयुक्ताभिन्नतादात्म्यश्चेति त्रयस्सन्निकर्षाः। तेषां चैतन्याभिव्यञ्जकवृत्तिजनन उपयोगः । द्रव्यप्रत्यक्षे संयोगः। तद्गतगुणादिप्रत्यक्षे संयुक्तत्तादाम्यम् । गुणादिगतधर्मादिप्रत्यक्षे संयुक्ताभिन्न तादाम्यम् । समवायसंयुक्तविशेषणतादीनामप्रमाणिकत्वेनानङ्गीकारात् । इदानीं घट इत्यादौ रूपवन्नीरूपस्यापि कालस्य प्रत्यक्षत्वम्। तत्र संयुक्तसंयोगस्सन्निकर्ष इति केचित् ।

४. विषयगतप्रत्यक्षत्वन्तु घटादिविषयस्य प्रमात्रभिन्नत्वम् । अधिष्ठानचेतन्यसत्तैव घटादिसत्ता। तदरिक्तारोपितसत्ताया अनङ्गीकारात्। विषयावच्छिन्नचैतन्यं प्रमातृचैतन्यश्चैकमेव अतो घटादेः प्रमात्रभिन्नत्वम्। तच्च प्रमातृचैतन्यसत्तातिरिक्तसत्ताशून्यत्वम् ।

५. ईश्वरसाक्षि जीवसाक्षीति साक्षिद्वैविध्यात् प्रत्यक्षमपि द्विविधम्। ईश्वरसाक्षिणोऽनादित्वेपि सृज्यमानप्राणिकर्मवशेनेश्वरोपाधिभूतमायायास्स्र ष्टव्यं पालयितव्यमित्याद्याकारा वृत्तिविशेषा जायन्ते । तत्प्रतिबिम्बितेशचैत न्यमपि सादि भवतीति तदैक्षतेति श्रुत्युपपत्तिः । ईश्वरप्रत्यक्षे न वृत्तिरपेक्षिते । ब्रह्मचैतन्यस्य सर्वोपादानतया सर्वतादात्म्यापन्नत्वेन स्वसंसृष्टसर्वावभासकत्वात् । जीवप्रत्यक्षे तु वृत्तिरावश्यकी । तस्याविद्योपाधिकतया सर्वगतत्वेप्यनुपादानत्वेनासङ्गित्वादिति विवरणे इति प्रत्यक्ष निरूपणम् ।

६. अनुमितिकरणमनुमानम् । तच्च व्याप्तिज्ञानम् । संस्कारो व्यापारः । न तु लिङ्गपरामर्शो व्याप्तिस्मरणञ्च । पक्षधर्मताप्रत्यक्षानन्तरमु द्बुद्धे व्याप्त्यनुभवजन्यसंस्कारे सति अनुमित्युत्पत्तेरानुभविकत्वेनान्वयव्यतिरे काभ्यां व्याप्तिज्ञानस्यैवानुमितिकरणत्वम् । परामर्शादेरन्वयव्यतिरेका-भावात्। तथा च व्याप्त्यनुभवः करणम् । तज्जन्यसंस्कारो व्यापारः। तदुद्बोधकत्वेन पक्षधर्मताज्ञानं सहकारि। अनुमितिः फलम्। व्याप्तिज्ञानस्य वह्निज्ञानांश एव करणत्वम् । वन्ह्यंश एवानुमितित्वमनुमितेः। न तु पक्षांशे पर्वतज्ञानस्य प्रत्यक्षत्वात् ।

७. अनुमानं द्विविधम् । स्वार्थं परार्थञ्चेति । स्वार्थं स्वानुमितिकरणम् । न्यायप्रयोज्यं परार्थानुमानम् । अवयवत्रयं न्यायः । व्यवहारे भाट्टनय इत्यङ्गीकारात् । तच्च प्रतिज्ञाहेतूदाहरणानि । उदाहरणोपनयनिगमनानि वा । पर्वतो वह्निमान् धूमात् । महानसवदित्यादावेतेनैव व्याप्तिपक्षधर्मतयोरुपदर्शनसम्भवेऽधिकस्य वैय्यर्थ्यात् ।

८. व्याप्तिश्चाव्यभिचरितसहचारदर्शनाद् गृह्यते । सा चान्वयमुखेनैव । सर्वस्यापि ब्रह्माद्युपादाननिष्ठात्यन्ताभावप्रतियोगित्वेन केवलान्वयित्वाभावा त्तव्यास्यभावः । साधनेन साध्यसाधने साध्याभावहेत्वभावयोर्व्याप्तिरनुयोगाद नुमितिं प्रत्यहेतुत्वाव्यतिरेकव्याप्तिरपि नास्ति । पृथिव्यामितरभेदज्ञानन्त्वर्था पत्त्यैव । अत एवान्वयव्यतिरेक्यपि न । इत्यनुमाननिरूपणम् ।

९. सादृश्यप्रमाकरणमुपमानम् । गवयनिष्ठगोसादृश्यज्ञानं करणम् । गोनिष्ठगवयदृश्यज्ञानं फलम् । अतिदेशवाक्यार्थज्ञानजन्यसंस्कारो व्यापारः । केचित्तुसर्वत्र प्रमाणजन्यज्ञानस्यापूर्वहानोपादानादिप्रवृत्तिजनकत्वनियमात् स्वकीयगोनिष्ठगवयसादृश्यज्ञानं न फलम् । तदभावात् । किन्तु नैय्यायिकोक्तं गवयपदवाच्यत्वज्ञानमेव । तस्य प्रवृत्तिजनकत्वादित्याहुः ॥ इत्युपमाननिरूपणम् ।

१०. अबाधिततात्पर्यविषयीभूतसंसर्गवद्वाक्यं प्रमाणशब्दः । शाब्दबोध आकाङ्क्षा योग्यता तात्पर्यज्ञानमासत्तिश्च कारणम् । पदानां परस्परजिज्ञासाऽऽकाङ्क्षा । आकाङ्क्षासमर्पकपदाप्रयोगेऽध्याहृत्य योजना । अर्थाध्याहारे शाब्दत्वानुपपत्तिः । पदार्थसंसर्गाबाधो योग्यता । पदार्थसंसर्गानुभवजननयोग्यत्वं तात्पर्यम् । अव्यवधानेन पदजन्यपदार्थोप स्थितिरासत्तिः । सैव व्यापारो भवति । शाब्दबोधः फलम् ।

११. पदार्थो द्विविधः । शक्यो लक्ष्यश्च । शक्तिज्ञाप्यश्शक्यः । शक्तिः पदार्थान्तरमित्युक्तम् । अनेकव्यक्तिस्थले जातौ शक्तिः एकव्यक्तिस्थले व्यक्तौ । शक्तिनिरूपकं शक्तं पदम् । लक्षणाज्ञाप्यो लक्ष्यः । शक्यसम्बन्धो लक्षणा । सा द्विविधा । केवललक्षणा लक्षितलक्षणेति । साक्षाच्छक्यसम्बन्ध आद्या । गङ्गायां घोषः ।

शक्यपरम्परासम्बन्धे द्वितीया । द्विरेफपदस्य भ्रमरपदद्वारा मधुकरे । सिंहो माणवक इत्यत्र सिंहशब्दस्य सिंहसम्बन्धिक्रौर्यसम्बन्धो माणवके। केवललक्षणा त्रिविधा । जहत्यजहती जहदजहती चेति।विषं भुङ्क्ष्वेत्यादौ शक्यार्थमनन्तर्भाव्य शत्रुगृहे भोजननिषेधो लक्ष्यते इति जहल्लक्षणा। शुक्लो घट इत्यादौ शक्यार्थं शुक्लं रूपमन्तर्भाव्यैव तद्वति वृत्तेरजहल्लक्षणा। विशिष्टवाचकपदस्य विशेषणांशत्यागे सोऽयं देवदत्तस्तत्त्वमसीत्यादौ जहदजहल्लक्षणा । केचित्तु तत्त्वमसीत्यादौ शक्यार्थैकदेशत्यागेपि न लक्षणा । शक्यसम्बन्ध्यन्यार्थस्वीकाराभावात्।काकेभ्यो दधि रक्ष्यतामित्यादौ केवलशक्यकाकापरित्यागेन दध्युपघातकत्वसम्बन्धेन बिडालादीनामापग्रहणाज्जहदजहल्लक्षणेत्याहुः । लक्षणाबीजं तात्पर्यानुपपत्तिः ।

१२. शक्तिः पदे । लक्षणा पदवाक्ययोः । अर्थवादवाक्यस्य प्राशस्त्ये लक्षणाया आवश्यकत्वात् । एकपदे लक्षणामङ्गीकृत्यान्येषां तात्पर्यग्राहकत्वं न च वाच्यम्। प्राशस्त्यरूपलक्ष्यार्थातिरिक्ततात्पर्यभावात्। अन्ये तु शक्तिज्ञाप्यार्थबोधकं शक्तमित्यङ्गीकारात् पदवद्वाक्येऽपि शक्तिः। तथा च वाक्ये लक्षणाया नानुपपत्तिरित्याहुः । तस्मादर्थवादवाक्यस्य पदस्थानीयतया विधिवाक्येनैकवाक्यत्वादर्थवादवाक्यस्थपदानां पदैकवाक्यता । यत्राभिन्नसंसर्गकवाक्ययोराकाङ्क्षावशान्महावाक्यार्थबोधकत्वं तत्र वाक्यैकवाक्यता ।

१३. लौके वेदे च कार्यपराणामिव सिद्धार्थपराणामपि वाक्यानां प्रामाण्यम् । भारतादिलौकिकवाक्यानां सजातीयोच्चारणानपेक्षोच्चारणात् पौरुषेयत्वम् । वेदानां तदभावादपौरुषेयत्वम् । वियदादिवत् सृष्टिकाल उत्पत्तिः प्रलये नाश इति वेदानां न क्षणिकत्वम् । अस्य महतो भूतस्य निश्वसितमेतदृग्वेद इत्यादिश्रुतेरीश्वरादुत्पत्तिः । इत्यागमनिरूपणम्।

१४. तदन्यथानुपपत्त्या तत्कल्पनमर्थापत्तिः । उपपाद्यज्ञानं करणम् । उपपादकज्ञानं फलम् । पीनो देवदत्तो दिवा न भुङ्क्ते। रात्रिभोजनमुपपादकम् । पीनत्वमुपपाद्यम् । दृष्टार्थापत्तिरियम् । श्रुतार्थापत्तिर्द्विविधा । अभिधानानुपपत्तिरभिहितानुपपत्तिः । पदाध्याहारे

प्रथमा । वाक्याध्याहारेऽपि । द्वितीया यथा । स्वर्गकामो ज्येतिष्टोमेन यजेतेत्यादौ क्षणिकयागस्य स्वर्गसाधनत्वानुपपत्त्याऽपूर्वं कल्पत इत्यर्थापत्तिः ।

१५. अभावज्ञाने योग्यानुपलब्धिः करणम् । अनुपलब्धौ योग्यत्वञ्च तर्कितप्रतियोगिसत्त्वप्रसञ्जितप्रतियोगिकत्वम् । स्फीतालोकवर्ति-भूतलेऽत्र घटोऽस्ति चेदुपलभ्येतेति घटसत्त्वेनापादितोपलब्धिरूपप्रतियोगिकत्वम् । अभावेन्द्रिययोस्सन्निकर्षाभावाद् घटाभावाकारावृत्तिनेन्द्रियजन्या किन्त्वनुपलब्धिजन्येत्यभावप्रत्यक्षे तस्या मानान्तरत्वम् ।

१६. यद्यपि परिशेषः प्रमाणान्तरं परासिद्धवस्तुसाधने । स च प्रसक्तस्य प्रतिषेधेऽवशिष्टविशिष्टकल्पनम् । तथापि तस्यार्थापत्तावन्तर्भावान्न पृथगुक्तिः । तर्कस्यापि दूषणानुमानेऽन्तर्भावः ।

१७. प्रमाणानां प्रामाण्यस्योत्पत्तौ ज्ञप्तौ च स्वतस्त्वम् । आगन्तुकभावाकारणानपेक्षज्ञानसामान्यग्राहक सामग्री प्रयोज्यत्वमुत्पत्तौ स्वतस्त्वम् अदृष्टादिसापेक्षत्वादागन्तुकेति। दोषाभावासापेक्षत्वाद्भावेति। दोषासहकृतस्वाश्रयसामग्रीमात्रग्राह्यत्वं ज्ञप्तौ स्वतस्त्वम् । स्वं प्रामाण्यं तदाश्रयो वृत्तिज्ञानं तद्ग्राहिका दोषासहकृता या सामग्री साक्षिज्ञानं तद्ग्राह्यत्वम् । नैय्यायिकानुमानवारणाय मात्रेति । अप्रामाण्यस्य तु विसंवादादिलिङ्गकानुमितिविषयत्वात् परतस्त्वम् ।

१८. प्रामाण्यं द्विविधम् । व्यावहारिकतत्त्वावेदकत्वं पारमार्थिकतत्त्वावेदकत्वमिति । आद्यं वियदादिविषयकप्रमाणेषु । व्यवहारदशायां बाधाभावात् । द्वितीयन्तु जीवब्रह्मैक्यपरेषु तत्त्वमसीत्या-दिषु।

॥ इति श्रीकृष्णावधूतपण्डितविरचिते अद्वैतनवनीते
प्रमाणनिरूपणं नाम तृतीयगोलकम् ॥

॥ अथ दोषनिरूपणम् ॥

१. सर्वशास्त्रवादेषु तार्किकस्य मध्यवृत्तितया तन्मतानुसारेण
दोषा ज्ञेयाः ।

व्यवहारे भट्टनयस्तार्किकस्याथवा नयः ।
विरोधो यत्र चास्माकं त्यज्यते तत्र तन्मतम् ॥

इति तोटकाचार्योक्तिः । तत्त्वबुभुत्सूनां कथा वादः । मध्यस्थसम्मतः पूर्वोत्तरपक्षवाक्यसन्दर्भः कथा। तत्र दोषो निग्रहस्थानम्। प्रमाप्रतिबन्धको दोषः । वादिविशेष्यकप्रतिवाद्यवधिकापकर्षप्रकारकमध्यस्थवृत्तिज्ञानप्रयोजकत्वं निग्रहस्थानत्वम् । तानि च

१. प्रतिज्ञाहानिः	२. प्रतिज्ञान्तरम्	३.प्रतिज्ञाविरोधः
४. प्रतिज्ञासन्यासः	५. हेत्वन्तरम्	६. अर्थान्तरम्
७.निरर्थकम्	८. अविज्ञातार्थकम्	९. अपार्थकम्
१०. अप्राप्तकालम्	११. न्यूनम्	१२. अधिकम्
१३. पुनरुक्तम्	१४. अननुभाषणम्	१५. अज्ञानम्
१६.अप्रतिभा	१७. विक्षेपो	१८. अमतानुज्ञा
१९. पर्यनुयोज्योपेक्षणम्	२०. निरनुयोज्यानुपयोगः	२१. अपसिद्धान्तः

२२. हेत्वाभासश्चेति द्वाविंशतिः

२. (१) प्रतिज्ञातस्य त्यागः प्रतिज्ञाहानिः । पर्वतो वह्निमान् प्रमेयत्वादित्युक्तेऽनेकान्त्येऽभिहिते तर्हि माभूत् पर्वतो वह्निमानिति।

(२) सामान्यत उक्तस्य परेण दोषोद्भावने कृते विशेषेण विन्यासः प्रतिज्ञान्तरम् । द्रव्यं प्रत्यक्षमित्युक्त आकाशादौ बाधेऽभिहिते रूपवद् द्रव्यमित्यादि । (३) स्ववाक्ये मिथो व्याघातः प्रतिज्ञाविरोधः। मे माता वन्ध्येति । (४) स्वोक्तापलापः प्रतिज्ञासन्यासः । अग्निरनुष्ण इत्युक्ते प्रमाणविरोधाभिधाने सति न मया तथोक्तमाग्निरुष्ण इत्येवोक्तमिति। (५) उक्त हेतौ दोषोद्भावने विशेषणान्तरप्रक्षेपो हेत्वन्तरम् । शब्दोऽनित्य ऐद्रियकत्वादित्युक्ते सामान्ये व्यभिचारेऽभिहिते सामान्यवत्वं हेतुविशेषणम्। (६) प्रकृतानुपयुक्तार्थकथनमर्थान्तरता। घटो द्रव्यं प्रमेयत्वादित्युक्ते साध्यमनुमीयत अनेनेति करणव्युत्पत्त्या प्रमेयत्वहेतुरनुमानशब्दवाच्यं भवतीति । (७) अवाचकपदप्रयोगो निरर्थकम्। शब्दो नित्यः कचटतपानां जबगडदत्वादिति ।(८) त्रिवारमुक्तेपि परिषदाद्यज्ञानार्थक पदादिप्रयोगोऽवि ज्ञातार्थम् । कश्यपतनयाधृतिहेतुस्त्रिनयनतनयवाहनसनामवानिति । भूधरश्शिखिमान् । (९) अनन्वितप्रयोगोऽपार्थकम्। कुण्डमजाजिनं षडपूजा इति । (१०) क्रमविपर्यासोऽप्राप्तकालम्।

उद्देश्यं प्रथमं पश्चाद्विधेयं साधनं ततः ।
परेण परदोषोक्तिः स्वसिद्धान्तैस्स्वसाधनम् ॥
अय वादक्रमस्तत्राप्राप्तकालं विपर्यये ।

इत्युक्तेः । (११). आवश्यकानुक्तिर्न्यूनम् । (१२) विवरणादिना पुनरुक्तिरधिकम् । (१३) प्रतीतार्थस्य प्रयोजनं विनोक्ते पुनरुक्तम्। (१४) वाद्युक्तस्य मध्यस्थेनानूदितस्याप्युत्तरानुक्तिरननुभाषणम् । (१५) द्विवारमुक्तस्य परिषदनूदितस्याप्यप्रतिपत्तिरज्ञानम् (१६) वाद्युक्तस्य प्रत्युत्तराप्रतिपत्तिरप्रतिभा । (१७) केनचिद्व्याजेन कथाविच्छेदो विक्षेपः। (१८) वाद्युक्तस्येष्टापादनं मतानुज्ञा । त्वं परस्त्रीगामी पुरुषत्वादित्युक्ते जारत्वं प्रसज्येतेति । (१९) अवश्योद्भाव्यदोपानुद्भावनं पर्यनुयोज्यो-पेक्षणम्। (२०) अतन्निग्रहप्राप्तौ तन्निग्रहोद्भावनं निरनुयोज्यानुयोगः । स चतुर्विधः । छलं हान्याद्याभासोऽप्राप्तकाले ग्रहणं जातिरिति । अर्थान्तरं प्रकल्प्यदूपणं छलम् । भ्रान्त्या निग्रहस्थानोद्भावनं

हान्याद्याभासः। कालमतिक्रम्य दोषोद्भावनमप्राप्तकाले ग्रहणम् । दूषणासमर्थमुत्तर जातिः साधर्म्यसमादिभेदेनेयं चतुर्विंशतिधा । एतद्विस्तरस्तु मत्कृते लोकोपकारे द्रष्टव्यः । (२१) स्वसिद्धान्तविरोधोऽप सिद्धान्तः ।

३. हेत्वाभासस्तु व्यभिचारादयः । असाधारण्यानुपसंहारित्वयोर्न दोपत्वम् । केवलान्वय्यनङ्गीकारात् । विरोधोपि न दोषान्तरम् । व्यभिचारेण चारितार्थ्यात् । व्यतिरेकव्याप्त्यभावाच्च । प्रकरणसाम्यमाभास साम्यञ्च दोषान्तरम् । एकस्यैव हेतोस्साध्यतदभावोभयसाधकत्वे वा प्रकरणसाम्यम् । शब्दो नित्य आकाशवृत्तित्वादिति । आभाससाम्यन्तु वादिप्रतिवादिमध्यस्थानामप्यसिद्धवस्तुसाधन उपयोगिव्याप्तिपक्षधर्मतादि-साम्यं । अयं घट एतद्घटत्वाभाववान् घटत्वात् घटान्तरवत् । इदमाभासितानुमानं । एतत्साम्यज्ञानमनुमितेः प्रामाणिकत्वज्ञानप्रतिबन्ध कम् ।

४. अन्ये हेत्वाभासा नैय्यायिकवद्द्रष्टव्याः असिद्धिभेदास्तर्कभेदा अन्योन्याश्रयादयो मत्कृते न्यायनवनीते लोकोपकारे च द्रष्टव्याः । निश्चितसाध्याभाववति पक्षादन्यत्र हेतुसंशयो निश्चितहेतुमति साध्यसंशयश्च सन्दिग्धानेकान्त्यम् । पक्षांशे साध्यसिद्धौ पक्षे साध्यांशसिद्धौ च सिद्धसाधनता । एवमेव भागासिद्धिरपि । पक्षांशस्यासिद्धावंश आश्रयासिद्धिः ।

॥ इति श्रीकृष्णावधूतपण्डितविरचिते अद्वैतनवनीते
दोपनिरूपणं नाम चतुर्थगोलकम् ॥

अथ मतभेदनिरूपणम्

१. उपादानविचारः । ब्रह्मण उपादानत्वं नाम अविद्यया वियदादिप्रपञ्चरूपेण विवर्तमानत्वम् । प्रकृतेरुपादानत्वं तु परिणामित्वम् । उपादानत्वाभिमतवस्तुसत्ताभिन्नसत्ताकत्वे सति तदनन्यत्वाविरोधित्वम्

विवर्तत्वम् । तादृशवस्तुसत्तासमानसत्ताकत्वे सति तदवस्थाविशेषत्वम् परिणामित्वम् ।

२. शुद्धब्रह्मैवोपादानम् । जन्मादिसूत्रतद्भाष्ययोरुपादानत्वस्य ज्ञेयब्रह्मलक्षणत्वोक्तेरिति सङ्क्षेपशारीरपक्षः । सर्वज्ञत्वादिविशिष्टं मायाशबलमीश्वररूपमेव ब्रह्म जगदुपादानम् ''अन्तस्तद्धर्मोपदेशात्'' ''सर्वत्र प्रसिद्धोपदेशात्'' इति सूत्रभाष्ये सर्वोपादानप्रयुक्तसर्वात्मकत्वस्य जीवव्यावृत्तेश्वरलिङ्गोक्तेरिति विवरणपक्षः ।

३. प्रपञ्चस्येश्वराश्रितमायापरिणामत्वात्तत्रेर उपादानम् । अन्तःकरणादेरीश्वराश्रितमायापरिणाममहाभूतोपसृष्ट जीवाविद्याकृतभूत सूक्ष्म कार्यत्वात्तत्र जीवेश्वरयोरुभयोरुपादानत्वमिति मायाविद्ययोर्भेदवादिनः । वियदादेरीश्वराश्रितमायापरिणामत्वात् तत्रेश्वर उपादानम् । अन्तःकरणादेर्जीवाश्रिताविद्यामात्रपरिणामत्वात् तत्र जीव एवोपादानमिति तदेकदेशिनः । अन्तःकरणादेर्जीवतादात्म्यप्रतीत्या जीव एव तदुपादानम् । अध्यासभाष्येऽन्तःकरणादीनां जीवेऽध्यासस्य दर्शितत्वादिति केचित् ।

४. अन्ये तु व्यावहारिकप्रपञ्चस्य निरवयवब्रह्मैवोपादनम् । जीवस्तु प्रतिभासिकस्वाप्नप्रपञ्चस्य । ''आत्मनि चैवं विचित्राश्च हि'' इति सूत्रेण विवर्तवादाभिप्रायेण जीवात्मनि स्वरूपानुपमर्देन स्वाप्नप्रपञ्चसृष्टिवत् ब्रह्मणि वियदादिसृष्टिरिति सिद्धान्तितत्वादित्याहुः ।

५. अपरे तु जीव एव स्वप्नद्रष्टवत् स्वस्मिन्नीश्वरादिसर्वकल्पकतया सर्वप्रपञ्चस्योभयविधं कारणमिति वदन्ति ।

६. जीवाश्रितमायाविषयीकृतं ब्रह्मैव जडप्रपञ्चाकारेण विवर्तमानत्वादुपादानम् । माया तु सहकारिमात्रम् । न तु कार्यानुगतमिति वाचस्पतिमिश्राः ।

७. मायाशक्तिरेवोपादानम् । न तु ब्रह्म । किन्तु जगदुपादानमायाधिष्ठानत्वेनौपचारिकमुपादानत्वमिति सिद्धान्दमुक्तावलीकाराः । इत्युपादानविचारः ।

८. अथ जीवेश्वरविचारः । अनादिरनिर्वाच्या मूलप्रकृतिः । तत्र चिन्मात्रसम्बन्धिनी माया । तस्यां चित्प्रतिबिम्ब ईश्वरः । तत्रैवावरणविक्षेपशक्तिमत्यविद्या । तस्यां परिच्छिन्नानेकप्रदेशेषु चित्प्रतिबिम्बो जीव इति प्रकटार्थविवरणे ।

९. एकैव मूलप्रकृतिर्विक्षेपशक्तिप्राधान्येन मायाशब्दितेश्वरोपाधिः। आवरणप्राधान्येनाविद्याशब्दिता जीवोपाधिः । अत एव जीवस्याऽज्ञानानुभवो नेश्वरस्य । ब्रह्म नास्ति न प्रकाशत इति व्यवहारयोग्यत्वमावरणत्वम्। तत्तज्जीवसाधारणसुखदुःखाद्यनुकूला विक्षेपशक्तिरिति तत्त्वविवेके ।

१०. अविद्यायां चित्प्रतिबिम्ब ईश्वरः । अन्तःकरणेषु चित्प्रतिबिम्बो जीवः । ''कार्योपाधिरयं जीवः कारणोपाधिरीश्वर'' इति श्रुतेरिति सङ्क्षेपशारीरके!

११. चित्रदीपे तु स्थूलसूक्ष्मदेहद्वयस्याधिष्ठानतया विवर्तमानं तदनवच्छिन्नचैतन्यं कूटवन्निर्विकारत्वेन स्थितत्वात् कूटस्थम् । तत्र कल्पितेऽन्तःकरणे प्रतिबिम्बितं चैतन्यं संसारी जीवः अनवच्छिन्नचैतन्यं ब्रह्म । तदाश्रिते मायातमसि स्थितासु सर्वप्राणिनां धीवासनासु प्रतिबिम्बितं चैतन्यमीश्वर इत्युक्तम् ।

१२. ब्रह्मानन्दे तु परमात्मा मायातत्कार्योपाधिरहितश्शुद्धः मायोपहित ईश्वरः । अपञ्चीकृतभूतकार्यसमष्टिसूक्ष्मशरीरोपहितो हिरण्यगर्भः। पञ्चीकृतभूतकार्यसमष्टिस्थूलशरीरोपहितो विराट्पुरुष इत्यवस्थाचतुष्ट्यमेकस्यैव परमात्मनः । अस्मिंश्च चित्रपटस्थानीये चित्रस्थानीयः प्रपञ्चः स्थावरजङ्गमात्मकः । यथा चित्रगतमनुष्याणां चित्राधारवस्त्रसदृशा वस्त्राभासा लिख्यन्ते तथा परमात्माध्यस्तदेहिनामधिष्ठानचैतन्यसदृशाश्चिदाभासाः कल्प्यन्ते । ते च जीवनामानस्संसरन्तीति ।

१३. अज्ञानमेकमेव जीवेश्वरयोरुपाधिः । तत्र बिम्बस्थानीय ईश्वरः ।प्रतिबिम्बा जीवाः ।अज्ञानप्रतिबिम्बितस्य जीवस्यान्तःकरणरूपाज्ञानपरिणामभेदो विशेषाभिव्यक्तिस्थानं सूर्यातपस्य दर्पण इवेति विवरणपक्षः ।

१४. केचित्तु घटाकाशवदन्तःकरणावच्छिन्ना जीवास्तदनवच्छिन्न ईश्वरः । प्रतिबिम्बिपक्षेऽपि उपाध्यनन्तर्गतस्यैव चैतन्यस्य बिम्बत्वम्। जलचन्द्रन्यायादिति ।

१५. अपरे तु न प्रतिबिम्बो जीवः । नाऽप्यवच्छेदः । किन्तु कौन्तेयस्य राधेयत्ववदविकृतस्यैव ब्रह्मण एवाविद्या जीवभावः। ब्रह्मैव स्वाविद्यया संसरति स्वाविद्यया विमुच्यते इति बृहदारण्यभाष्योक्तेः।

राजसूनोस्स्मृतिप्राप्तौ व्याध भावो निवर्तते ।
तथैवमात्मनोऽज्ञस्य तत्त्वमस्यादिवाक्यतः ॥

इति वार्तिकोक्तेश्च । एवञ्च स्वाविद्याया जीवभावमाप्तस्यैव ब्रह्मणः प्रपञ्चकल्पकत्वादीश्वरोऽपि सर्वज्ञत्वादिधर्मैस्साकं स्वप्नोपलब्धदेवतावज्जीव कल्पित इति वदन्ति ।

१६. अथ जीवैकानेकत्वविचारः । एक एव जीवः । तस्यैकमेव शरीरं सजीवम् । अन्यानि स्वप्नदृष्टशरीराणीव निर्जीवाणि। तदज्ञानकल्पितं सर्वं जगत् । तस्य स्वप्नदर्शनवद्यावदविद्यं सर्वोऽपि व्यवहारः । बद्धमुक्तभेदो नास्ति । शुकमुक्त्यादिकमपि स्वप्नवत् कल्पितमिति केचित् ।

१७. हिरण्यगर्भ एक एव ब्रह्मप्रतिबिम्बो मुख्यो जीवः । अन्ये तु तत्प्रतिबिम्बभूता जीवा अविद्यायां जीवाभासास्संसारिण इति सविशेषानेकशरीरैकजीववादिनः । हिरण्यगर्भस्य प्रतिकल्पं भेदेन कस्य हिरण्यगर्भस्य मुख्यजीवत्वमित्यत्र नियामकाभावादेक एव जीवोऽविशेषेण सर्वशरीरमधितिष्ठतीत्यविशेषानेकशरीरैकजीववादिनः ।

१८. ''प्रतिषेधादिति चेन्न शरीरादि''ति सूत्रभाष्यानुसारेण बद्धमुक्तव्यवस्थाङ्गीकारादन्तःकरणोपाधिभेदेनानेके जीवा इत्यनेकजीववादिनः ।

१९. अथ बन्धमोक्षविचारः । शुद्धब्रह्माश्रयकं तद्विषयकमेवाज्ञानम् तच्च सांशं क्वचिदुपाधौ ब्रह्मज्ञाने जातेंऽशेन निवर्तते । उपाध्यन्तरेष्वंशेनानुवर्तत इति बद्धमुक्तव्यवस्थां केचिदाहुः । अपरे तु नाज्ञानं ब्रह्माश्रयं किन्तु जीवाश्रयं ब्रह्मविषयम् । तच्चान्तःकरणप्रतिबिम्बेषु जीवेषु व्यक्तिषु जातिरिव तिष्ठति । तत्रोत्पन्नज्ञानं नष्टां व्यक्तिं जातिरिव त्यजति स एव मोक्षः । अन्यानाश्रयति यथापूर्वं स एव बन्धः । इतरे तु प्रतिजीवमविद्याभेदः । प्रपञ्चस्तु सर्वतन्त्वारब्धपटवत् सर्वाविद्याजन्यः । एकस्य मुक्तौ तदविद्यानाशे तत्साधारणप्रपञ्चनाशः। एकतन्तुनाशे पटैकदेशस्येव । अन्यैरन्यांशस्य निवृत्तिरिति ।

२०. पुनरन्ये तत्तदज्ञानकृतप्रातिभासिकरजतवत्तत्तदविद्याकृतः प्रपञ्चः प्रतिपुरुषं भिन्नः । ऐक्यबुद्धिस्तु भ्रमः । पुनरेके वदन्ति। जीवाश्रिताविद्यातो भिन्नेश्वराश्रितमायैव प्रपञ्चकारणम् । जीवानामविद्या तु प्रातिभासिकस्वाप्ने स्वावरणे चोपयुक्तेति ।

२१. अथावरणविचारः । द्विविधं विषयावरकमज्ञानम् । विषयाश्रितमेकं विक्षेपोपादानभूतम् । जीवाश्रितमन्यत् । घटमहं न जानामीत्यनुभविकम् । वाचस्पत्यनुसारिणस्तु नयनपटलवत् पुरुषाश्रितमेवाज्ञानं विषयावरणम् । तदतिरेकेण विषयाश्रिताज्ञाने प्रमाणाभावः । सर्वस्य प्रपञ्चस्य जीवाज्ञानविषयीकृतब्रह्मविवर्तत्वादिति । अपरे त्वज्ञानस्य शुक्तिरजतादिपरिणामोपपत्त्या विषयाश्रितमेवाज्ञानं तदावरणमित्याहुः ।

२२. चैतन्यमात्रावरकमेकमेवाज्ञानमिति पक्षे विषयावच्छिन्नप्रदेशे वृत्त्युपगमेन खद्योतादिप्रकाशेन तमस इवैकदेशनाशो वा भीतभटवदपसरणं वाऽभिभवः । अज्ञानानेकत्वपक्षे यथा ज्ञानप्रागभावानामनेकेषां सत्वेऽप्येकज्ञानोदय एक एव प्रागभावो निवर्तते । संशयादिजननशक्ततया तदावरणरूपेषु प्रागभावान्तरेषु सत्स्वपि विषयावभासः तथैकज्ञानोदय एकमेवाज्ञानं निवर्तते । अज्ञानान्तरेषु सत्स्वपि विषयावभास इत्यप्पय्यदीक्षितकृतसिद्धान्तलेशसङ्ग्रहवाक्येन । एतेन प्रागभावस्यापि विषयावरकत्वमुक्तमित्यवगन्तव्यम् ।

२३. अथ साक्षिविचारः । देहद्वयाधिष्ठानभूतं कूटस्थचैतन्यं स्वावच्छेदकस्य देहद्वयस्य साक्षादीक्षणान्निर्विकारत्वाच्च साक्षीत्युच्यत इति कूटस्थदीपे । तत्त्वप्रदीपिकायान्तु मायाशबलिते सगुणे परमेश्वरे केवलो निर्गुण इति विशेषणानुपपत्तेस्सर्वप्रत्यग्भूतं विशुद्धं ब्रह्म जीवाभेदेन साक्षीति प्रतिपाद्यत इति । कौमुद्यान्तु "एको देव" इति श्रुतेः परमेश्वरस्यैव रूपभेदः कश्चिज्जीवः । प्रवृत्तिनिवृत्त्योरनुमन्ता स्वयमुदासीन स्साक्षी । स च प्राज्ञ इति । केचिदविद्योपाधिजीव एव साक्षी "एको देव" इति मन्त्रस्तु ब्रह्मणो जीवभावाभिप्रायेणेति वदन्ति । अन्येत्वन्तःकरणोपधानेन जीवस्साक्षी । तदवच्छेदेन प्रमाता। सुषुप्तावपि संस्काररूपेणान्तःकरणसत्वात्तदपि साक्षीति ।

२४. साक्षिणोऽज्ञानावृतत्वं साक्ष्यानन्दस्याप्यनावृतत्वं विवरण उक्तम् । अहङ्कारानवच्छिन्नं चैतन्यम् देहान्तर इव स्वाप्नपदार्थाधिष्ठानम्। केचित्त्वहङ्कारोपहितं जीवप्रतिबिम्बरूपचैतन्यमात्रमधिष्ठानमिति ।

२५. अथ सृष्टिविचारः । सृष्टिर्द्विविधा । दृष्टिसृष्टिस्सृष्टिदृष्टि-रिति। कल्पितस्य पूर्वमज्ञातस्य सत्त्वमनुपपन्नमिति सर्वोऽपि जाग्रत्प्रपञ्चो दर्शनसमय एवोत्पन्नो भवति । दृष्टेः पूर्वं घटाद्यभावेन घटादृष्टेश्चक्षुस्सन्निक र्षानुविधानप्रतीतिर्न युज्यते । अथ स्वाप्नपदार्थानुभववज्जाग्रद्धटाद्यनुभवोऽपि न चाक्षुष इति दृष्टिसृष्टिवादिनः । अथैवंरीत्या जाग्रत्प्रपञ्चस्य कल्पितत्वाङ्गीकारे कल्पकः कः । न निरुपाधिकं ब्रह्म । मोक्षेऽपि साधनान्तरनिरपेक्षकल्पकस्य सत्वेन प्रपञ्चानुवृत्त्या मोक्षस्यापि संसाराविशेषप्रसङ्गात् । नाप्यविद्योपाधिकम् । त्वन्मत अविद्यायास्सादि त्वेन तस्या अपि कल्पनीयतया तत्कल्पनात् प्रागेव कल्पकसिद्धेर्वक्तव्यत्वेना न्योन्याश्रयादिति चेन्न । पूर्वपूर्वकल्पिताविद्योपहितमुत्तरोत्तराविद्या-कल्पकम् । बीजाङ्कुरन्यायेनानादित्वादित्याहुः ।

२६. अन्ये त्वस्मदाद्यज्ञातायास्सत्त्वमभ्युपगम्यते । तथा चाविद्याया अनादित्वादविद्याविषये दृष्टिसृष्टिर्नास्ति तत्कल्पकोऽपि न । किन्तु प्रपञ्चमात्र एव दृष्टिसृष्टिस्तत्कल्पक अविद्योपाधिक आत्मेत्याहुः ।

२७. अपरे तु जाग्रत्प्रपञ्चसर्गादेर्न कोऽपि कल्पकः । तर्ह्यात्मन आकाशस्सम्भूत इत्यादिश्रुतेः कोऽर्थ इति चेत् । निष्प्रपञ्चब्रह्मात्मैक्ये तात्पर्यात् । अध्यारोपापवादाभ्यां निष्प्रपञ्चब्रह्मप्रतिपत्तिर्भवतीति तत्प्रतिपत्त्युपायतया श्रुतिषु सृष्टिप्रलयोपन्यासो न तत्र तात्पर्यमिति भाष्योद्घोषादिति ।

२८. सिद्धान्तमुक्तावलीकारास्तु दृश्यप्रपञ्चतादात्म्यापन्नज्ञानस्वरूप मेव प्रपञ्चस्याद्यक्षणावच्छिन्नं सत् प्रपञ्चस्य सृष्टिरित्युच्यते । अतस्स्वप्रकाशज्ञानस्वरूपमेव विश्वसृष्टिर्दृग्दृश्ययोरभेतात् ।

ज्ञानस्वरूपमेवाहुर्जगदेतद्विचक्षणाः ।
अर्थस्वरूपं भ्राम्यन्तः पश्यन्त्यन्ये कुदृष्टयः ॥

इति स्मृतेति ।

२९. सृष्टिदृष्टिस्त्वीश्वरसृष्टमज्ञातसत्ताकमेव विश्वम् । तत्तद्विषयप्रमाणावतरणष तस्य तस्य दर्शनं भवति । प्रत्यक्षं प्रति विषयस्य कारणत्वेन प्रपञ्चस्य ज्ञानसमयत्वायोगात् कार्यकारणभावस्य भेदनिबन्धनत्वान्ना भेदः प्रपञ्चज्ञानयोरित्यद्वैताचार्याः । न च तर्हि प्रपञ्चस्य सत्यत्वं स्यात् । तत्सृष्टिप्रलयोः श्रुत्युक्तत्वात् प्रत्यक्षादिप्रतिपन्नार्थक्रियाकारित्वाचेति वाच्यम् । प्रपञ्चस्याधिष्ठानसंस्कारदोषरूपत्वेन कारणत्रया- जन्यत्वाज्ज्ञानैकनिवर्त्यत्वरूपमिथ्यात्वाङ्गीकारादिति ।

३०. अथ मिथ्यापदार्थस्यार्थक्रियाकारित्वविचारः । मिथ्याप्रपञ्च स्यार्थक्रियाकारित्वं स्वप्नप्रपञ्चवत् । साधारणधर्मस्तु स्वसमानसत्ताकार्थक्रियाकारित्वम् । स्वप्नकालीनसुखभयादिकं जाग्रत्सुखादिवव्द्यावहारिकसत्यमेव न तु प्रातिभासिकम् । प्रबोधानन्तरम् बाधाभावादनुवर्तनाच्चेत्यद्वैत विद्याचार्याः ।

३१. ननु प्रपञ्चगतमिथ्यात्वस्य मिथ्यात्वे सत्यत्वमेव प्राप्तमन्यथाऽद्वैतहानिरिति चेन्न । मिथ्यात्वस्यापि प्रपंञ्चसमसत्ताकत्वेन स्वविरुद्धसत्यत्वप्रतिक्षेपकत्वात् । . धर्मस्य स्वविरुद्धधर्मप्रतिक्षेपकत्वे धर्मिसमसत्वं तंत्रमित्युभयवादि सिद्धमित्यद्वैतदीपिकाकारः ।

३२. स एतस्माज्जीवघनात् परात् परं पुरिशयं पुरुषमीक्षत इतीक्षतिकर्माधिकरण ईक्षतिकर्मत्वेन निर्दिष्टं यन्निर्गुणं ब्रह्म तदेव ध्यायतिकर्म । आनन्दादयः प्रधानस्येति सूत्रम् । आनन्दादिभिरस्थूलत्वादिभिरुपलक्षितमखण्डैकरसं ब्रह्मास्मीति निर्गुणत्वानुपमर्देनोपसंहृत्योपासनसम्भवान्निर्गुणब्रह्मैवोपास्यमिति ध्यानदीपादौ ।

३३. चैतन्यं न चक्षुरादिजन्यवृत्तिविषयः । "पराञ्चि खानि व्यतृणादिति" श्रुतेः परमाण्वादिवच्चक्षुराद्ययोग्यत्वात् । किन्त्वोपनिषदत्वाद्वेदान्तजन्यवृत्तिविषय इति नियमादृष्टसहितं तादृशब्रह्मज्ञानमज्ञाननिवर्तकम्। कतकरजोन्यायेनात्मन्यध्यस्यमानं सत् पूर्वाध्यस्तसविलासमज्ञानं निवर्तयत् सत् स्वात्मानमपि निवर्तयति ।

३४. अन्येतु चरमवृत्तिरूपब्रह्मज्ञानस्य नाज्ञानतन्मूलप्रपञ्चनिवर्तकत्वम्। जडत्वात् । अज्ञानस्य प्रकाशनिवर्त्यत्वनियमात् । किन्तु वृत्त्युपारूढचैतन्य प्रकाशस्य । तस्य स्वरूपतोऽज्ञानादिसाक्षित्वेनाज्ञानाद्यनिवर्तकत्वेप्यखण्डाकारवृत्त्युपारूढस्य तन्निवर्तकत्वोपपत्तेरित्यग्निवत् स्वाश्रय- वृत्तिमपि नाशयतीति ।

३५. अन्येतु ब्रह्मज्ञानमज्ञानस्यैव निवर्तकं प्रपञ्चस्तूपादाननाशान्नश्यतीति तदन्तर्गतब्रह्मज्ञानस्यापि नाशः । एवञ्चेत् प्रारब्धकर्मभोगपर्यन्तं जीवन्मुक्तत्वमुपपद्यत इति ।

३६. **अत मोक्षविचारः** अविद्यानिवृत्तिरेव मोक्षः । साचात्मैवेति ब्रह्मसिद्धिकारः । ब्रह्मरूपाया अप्यविद्यानिवृत्तेरन्वयव्यतिरेकाभ्यां ज्ञानसाध्यत्वनियमादिति । आनन्दबोधाचार्यास्त्वात्मातिरिक्तैवाविद्यानिवृत्तिः । साच न सती । अद्वैतहानेः । नाप्यसती । ज्ञानसाध्यत्वायोगात्। नापि सदसद्रूपा । नाप्यनिर्वाच्या । अनिर्वाच्यस्य सादेरज्ञानोपादानकत्वनियमेन मुक्तावपि तदुपादानाज्ञानानुवृत्त्यापत्तेः । ज्ञाननिवर्त्यत्वापत्तेश्च। किन्तूक्तप्रकारचतुष्टयोत्तीर्णा पञ्चमप्रकारेति । अन्येत्वविद्यावत्तन्निवृत्तिरप्यनिर्वाच्यैव । मोक्षे तदनुवृत्तौ तदुपादानाज्ञानानुवृत्तिरप्यस्त्वित्यत्र

प्रमाणाभावात्। उत्पत्तेः प्रथमसमयमात्रसंसर्गिभावविकारत्ववन्निवृत्तेरपि चरमसमयमात्रसंसर्गिभावविकारत्वोपपत्तेरिति ।

३७. अथ प्रलय उच्यते । नित्यो नैमित्तिकः प्राकृत आत्यन्तिकश्चेति । नित्यप्रलयस्सुषुप्तिः । तदा धर्माधर्मपूर्वसंस्काराणां कारणात्मनावस्थानम् । तेन प्रबोधानन्तरं सुखाद्यनुभवस्मरणयोर्नानुपपत्तिः।

कार्यब्रह्मणो हिरण्यगर्भस्य दिवसावसाननिमित्तकस्त्रैलोक्यमात्रनाशो नैमित्तिकप्रलयः ।

प्राकृतप्रलयस्तु कार्यब्रह्मणो ब्रह्माण्डाधिकारलक्षणप्रारब्धकर्मसमाप्ता वुत्पन्नब्रह्मसाक्षात्कारैस्सत्यलोकवासिभिस्सह विदेहकैवल्यरूपा परा मुक्तिः। तदा ब्रह्माण्डतदन्तस्थभूतभौतिकादीनामप्राप्तब्रह्मज्ञानानाञ्जीवानाञ्च मायायां लयः । प्रकृतेस्तु न नाशः पुनस्सृष्ट्यर्था सा । ईश्वरात् पूर्ववत् सृष्टिः ।

तुरीयप्रलयस्तु ब्रह्मसाक्षात्कारनिमित्तकस्सम्पूर्णमोक्षो विदेहकैवल्य रूपः । तदा ब्रह्मैवाशिष्यते । स चैकजीववादे युगपदेव । अनेकजीववादे क्रमेण ।

३८. अथ मुक्तस्वरूपमुच्यते । एकजीववादे ब्रह्माज्ञानकल्पितस्य जीवेश्वरविभागादिसमस्तभेदप्रपञ्चस्य ब्रह्मज्ञानोदयेन नाशान्निर्विशेषचैतन्यरूपेणैवावस्थानम् ।

३९. अनेकजीववादे जीव इवेश्वरोऽपि प्रतिबिम्बविशेषो निर्विशेषब्रह्मण इति पक्षे मुक्तस्य बिम्बभूतशुद्धचैतन्यरूपेणेवावस्थानम्। अत्र वादे प्रतिबिम्बपक्ष एव साधुः । अवच्छेदपक्षे तु यदवच्छेदेन मुक्तिस्तदवच्छेदेनान्तःकरणसंसर्गे पुनरपि बन्धापत्तेः ।

४०. तत्रापि बिम्ब ईश्वरः प्रतिबिम्बा जीवा उभयानुस्यूतं शुद्धचैतन्यमिति पक्षे मुक्तस्य सर्वमुक्तिपर्यन्तं सर्वज्ञत्वसर्वकर्तृत्वसर्वेश्वरत्वसत्यकामत्वादिगुणकेश्वरभावप्राप्तिः । न च मुक्तस्याविद्याऽभावात्

सत्यकामत्वादिगुणविशिष्टेरनुपपत्तिरिति वाच्यम् । ऐश्वर्यस्याविद्यकत्वेपि न हीश्वरस्याविद्या निरञ्जनत्वात् । बद्धपुरुषान्तराविद्याकल्पितमेव । तस्मान्मुक्तस्येश्वरभावो युक्तः ।

निन्दको निकटे मेऽस्तु दोषमादाय तोषकृत् ।
गृहिणः श्रीमतो यद्वद्विष्टागर्तो गृहान्तिके ॥
यस्योपास्योपदेष्टारौ सूत्रकृत्समवर्तिनौ ।
जाप्यौ च तारकाष्टार्णौ तेनेदं कृतमर्थिसात् ॥

॥ इति श्रीकृष्णावधूतपण्डितविरचिते अद्वैतनवनीते
मतभेदनिरूपणं नाम पञ्चमगोलकम्
समाप्तोऽयं ग्रन्थः ॥

APPENDIX *A*

Definitions and Explanatory Phrases

अनादिपञ्चकम्	अनादिपञ्चकन्तु विशुद्धात्मा ईशो जीवः प्रकृतिरेतेषां भेदश्चेति । (I.35)
अपवादः	शुक्तौ रजतवद् ब्रह्मणि प्रपञ्चो नास्तीति निषेधोऽपवादः । (I. 18)
अवच्छेदः	कार्यान्वयि व्यावर्तकं विशेषणमवच्छेदः । (II. 3)
आकारः	आकारवतामनेकत्व आकारो जातिः । तस्यैकत्वे गुण एव । (II. 13)
आत्मा	आत्मा निष्क्रिय आकाशवदसङ्गो निरंशः परिपूर्ण चैतन्यं सदानन्दरूपो निर्विकार अकर्ताऽकारयिता निर्गुणोऽद्वयः परमात्मा ब्रह्म स्वप्रकाशो वियदादि प्रपञ्चाधिष्ठानञ्च । (I.19)
ईश्वरः	सृष्टेः पूर्वं मायायां प्रतिबिम्बितं शुद्धब्रह्मचैतन्यमीश्वरः (I. 4) । समष्टिकारणशरीरोपाधिक ईश्वरः (1. 13) । मायावच्छिन्नचैतन्यमीश्वरः (II. 2)
उपमानम्	सादृश्यप्रमाकरणमुपमानम् (III. 9)
उपाधिः	कार्यानन्वयि व्यावर्तकमुपाधिः । (II. 3)
कारणशरीरम्	समष्टिरूपा प्रकृतिरीश्वरस्य कारणशरीरम् (I. 6) व्यष्टिरूपाऽविद्याजीवानां कारणशरीरम् (I. 6)
जहदजहल्लक्षणा	विशिष्टवाचकपदस्य विशेषणांशत्यागे जहदजहल्लक्षणा । (III. 11)

जीवः	अविद्यासम्बद्धचैतन्यञीवः (II. 3) । अविद्यायां परिच्छिन्नानेकप्रदेशेषु चित्प्रतिबिम्बो जीवः(V.8)। अन्तःकरणेषु चित्प्रतिबिम्बो जीवः (V. 10) ।
तटस्थलक्षणम्	यावल्लक्ष्यमनवस्थितं सद् व्यावर्तकं तटस्थलक्षणम् (II. 23)
तमः	प्रत्यक्षप्रतिबन्धकं नीलरूपवत्तमः । (II. 10)
निर्विकल्पकम्	विशेषणविशेष्यसंसर्गानवगाहिज्ञानम् (II. 16) । तात्पर्यमात्रविषयस्य भानम् (II. 16)
परिणामः	उपादानत्वाभिमतवस्तुसत्तासमानसत्ताकत्वे सति तदवस्थाविशेषत्वं परिणामत्वम् । (V. I)
परिमाणम्	देशतः परिच्छेदः परिमाणम् । (II. 13)
प्रत्यक्षम्	तत्तदाकारवृत्त्यवच्छिन्नचैतन्यस्य तत्तदिन्द्रिययोग्यवर्तमानविषयावच्छिन्न चैतन्याभेदः (III.2) घटादिविषयस्य प्रमात्रभेदः (III. 4)
प्रामाण्यस्योत्पत्तौ स्वतस्त्वम्	आगन्तुकभावकारणानपेक्षज्ञानसामान्यग्राहकसामग्री प्रयोज्यत्वम् । (III.17)
प्रामाण्यस्य ज्ञप्तौ स्वतस्त्वम्	दोषासहकृतस्वाश्रयसामग्रीमात्रग्राह्यत्वं ज्ञप्तौ स्वतस्त्वम् । (III. 17)

ब्रह्मण उपादानत्वम्	जगदाकारेण परिणममाणाविद्याधिष्ठानत्वाद् ब्रह्मणो जगदुपादानत्वम् (II. 22)
मोक्षः	अविद्यानिवृत्तिरेव मोक्षः । (V. 36)
विवर्तः	उपादानत्वाभिमतवस्तुसत्ताभिन्नसत्ताकत्वे सति तदवस्थाविशेषत्वं विवर्तत्वम् । (V. 1)
विभुत्वम्	त्रिविधपरिच्छेदाभावः (II. 13)
वृत्तिज्ञानम्	जाग्रत्स्वप्नयोर्विषयप्रकाशकं वृत्तिज्ञानम् (I. 32)
सद्वितीयत्वम्	वस्तुतः परिच्छेदस्सद्वितीयत्वम् । (II. 13)
सप्तावस्थाः	आवरणं विक्षेपोऽज्ञानं परोक्षज्ञानमपरोक्षज्ञानमनर्थ निवृत्तिरानन्दवाप्तिरिति जीवस्य सप्तावस्थाः । (I. 17)
साक्षी	देहद्वयाधिष्ठानभूतं कूटस्थचैतन्यं स्वावच्छेदकस्य देहद्वयस्य साक्षादीक्षणान्निर्विकारत्वाच्च साक्षीत्यु च्यते । सर्वप्रत्यग्भूतं विशुद्धं ब्रह्म जीवाभेदेन साक्षी etc., (II. 23)
सृष्टिदृष्टिः	सृष्टिदृष्टिस्त्वीश्वरसृष्टमज्ञातसत्ताकमेव विश्वम् । तत्तद्विषयप्रमाणावतरणे तस्य तस्य दर्शनं भवति । (V. 29)
हिरण्यगर्भः	अपञ्चीकृतभूतकार्यसमष्टिसूक्ष्मशरीरोपहितो हिरण्यगर्भः । (V. 12)

APPENDIX *B*

Select Vedantic terms

अज्ञान	Nescience; the indeterminable principle that brings about the illusory manifestation of the world and veils *Brahman*.
अधिष्ठान	Substratum
अन्तःकरण	Internal organ consisting of बुद्धि, मनस्, चित्त and अहंकार
अध्यारोप	Superimposition
अध्यास	Superimposition
अपवाद	Withdrawal of superimposition
अर्थक्रिया-कारित्व	Practical efficiency
अविद्या	Nescience or that aspect of nescience which veils Brahman and gives rise to *Jīva*
अवच्छेदवाद	The view that *Jīva* is the appearance of *Brahman* as defined by *avidyā*
अव्याकृत	Unmanifest state of nescience
आवरणशक्ति	The veiling power of nescience
ईश्वर	*Brahman* associated with nescience: the cosmic self
उपादान	Material cause; *Brahman* is material cause as the substrate of *māyā*
उपाधि	Adjunct; qualification per accidens
ऐक्यापरोक्ष	Immediate experience of identity
कारणशरीर	Causal body

कूटस्थ	Immutable
चरमवृत्तिज्ञान	The last psychosis cognition comprehending *Brahman*
जहदजहल्लक्षणा	Exclusive-non-exclusive implication; a qualified word abandoning a part of its sense and denoting the remaining part only; i.e., तत्त्वमसि.
तटस्थलक्षण	Definition per accidens
तूलाविद्या	Derivative nescience
दृष्टिसृष्टिवाद	The theory that perception is creation
निर्विकल्पक	The stage of comprehension where the distinction of cogniser, the object cognised and the cognition is elimitated
पारमार्थिक	Noumenal; Real.
प्रतिबिम्बवाद	The view the *Jīva* is the appearance of Brahman as reflected in nescience
प्रमातृचैतन्य	Cognative consciousness
प्रमाणचैतन्य	Cogniser consciousness
प्रातिभासिक	Apparent
माया	Nescience or that aspect of nescience which gives rise to *Iśvara* and illusorily projects the world on Brahman
मिथ्यात्व	The nature of being indeterminable either as real or unreal
मूलाविद्या	Primal nescience
लिङ्गशरीर	Subtle body
विवर्त	Transfiguration; illusory appearance
विषयचैतन्य	Content defined consciousness

विक्षेपशक्ति	The Projecting power of nescience.
वृत्तिज्ञान	Cognition with a phychosis nature
व्यष्टि	A unit of an aggregate
व्यावहारिक	Phenomenal; empirical
शबल	*Brahman* associated with nescience
सदसद्विलक्षण	Neither real nor unreal
समष्टि	Aggregate
सविकल्पक	The stage of comprehension where the distinction between the cogniser and the object cognised is felt
साक्षी	Witness self
सूक्ष्मशरीर	Subtle body
सृष्टिदृष्टिवाद	The theory that world is created by *Iśvara* but its nature is indeterminable either as real or unreal
स्वरूपलक्षण	Definition by essential nature; constitutive definition
स्वसंवेद्य	Self-luminous
हिरण्यगर्भ	Cosmic form of the self creating subtle universe



DVAITA VEDANTA WORKS EDITED AND TRANSLATED

By Prof. K. T. PANDURANGI



1. विष्णुतत्त्वविनिर्णयः with Kannada translation, published by Sri Raghavendra Asrama Trust, 56/10, 17th Cross, Malleswaram, Bangalore. Rs. 18.00
2. सदाचारस्मृतिः with Kannada translation, published by Sri Raghavendra Seva Samiti, IV 'T' Block, Jayanagar, Bangalore-11 Rs. 2.25
3. ईशावास्य-तलवकारकाठकोपनिषदः with English translation, published by S.M.S.O. Sabha, Padmasarovara Rs. 12.00
4. षट्प्रश्न-आथर्वण-माण्डूक्योपनिषदः with English translation, published by S.M.S.O. Sabha, Padmasarovara Rs. 15.00
5. छान्दोग्योपनिषत् with English translation, published by S.M.S.O. Sabha, Padmasarovara Rs. 30.00
6. बृहदारण्यकोपनिषत् with English translation, published by S.M.S.O. Sabha, Padmasarovara Rs. 40.00
7. ऐतरेयोपनिषत् with English translation, published by S.M.S.O. Sabha, Padmasarovara Rs. 20.00
8. ब्रह्मसूत्रानुव्याख्यानम् Rs. 30.00
9. गीतातात्पर्यनिर्णयः with Kannada translation. Included in the Kannada Sarvamūla Volume I
10. ईशावास्योपनिषत् do Volume II

11. **Essentials of Yuktimallika** Rs. 10.00

12. **Essentials of Upanishads** Rs. 10.00

13. **Essentials of Bhagavadgita** Rs. 6.00

14. ಉಪನಿಷದ್-ದರ್ಶನ Volume I & II ಪ್ರತಿಗಳು ತೀರಿವೆ.
ಮಿಂಚಿನಬಳ್ಳಿ ಗ್ರಂಥಮಾಲೆ, ಧಾರವಾಡ

15. ಮಹಿಪತಿದಾಸರ ಕೃತಿಗಳಲ್ಲಿ ಆಧ್ಯಾತ್ಮಿಕ ದೃಷ್ಟಿ
ಪ್ರಕಾಶಕರು : ಡಾ. ಕೆ. ಎ. ಕಾಖಂಡಿಕಿ, ಇಳಕಲ್ Rs. 3.00

16. श्लोकतात्पर्यचन्द्रिका in the Press

17. अद्वैतनवनीतम् of Krishnavadhuta Pandita,
Edited with detailed introduction. Rs.35.00

18. ಹತ್ತನೆಯ ಮಾಧ್ವತತ್ವ ಸಮ್ಮೇಳನದ ಅಧ್ಯಕ್ಷ ಭಾಷಣ Rs. 2.00

19. ब्रह्मसूत्राणुभाष्यम् with Kannada translation
published by Sarvajnacharya Sangha,
Davanagere. Rs. 10.00

20. तत्त्वमञ्जरी with Kannada translation Rs. 40.00

21 तैत्तिरीयोपनिषत् Rs.15.00

(Copies of these publications can be had from the respective Publishers.
No.5,6,and 8 can be had from the author.)